लखन लालजी की तरह जो एक मात्र भगवान् को छोड़ किसी को नहीं मानते हैं उनके लिये कहा जाता है।

भागवत् ४।३१।१४

यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ।
प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥

भागवत् ११।५।४१

देवर्षिभूताप्तनृणां पितृणां न किंकरो नायमृणी च राजन् ।
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कृत्यम् ॥

यथा शिवसंहिता

श्री रामजी की भक्ति प्राप्त हो जाने के पश्चात् अन्य देवों की भक्ति से कोई प्रयोजन नहीं रह जाता है।

जन्मान्तरसहस्राणि तपोयोगसमाधिभिः ।
नराणां क्षीणपापानां रामे भक्तिः प्रजायते ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
पञ्चाङ्गस्योपासनेन रामभक्तिः प्रजायते ॥
इन्द्रादिदेवभक्तेभ्यो ब्रह्मभक्तोऽधिको गुणैः ।
शिवभक्ताधिको विष्णुभक्तः शास्त्रेषु गीयते ॥
सर्वेभ्यो विष्णुभक्तेभ्यो रामभक्तो विशिष्यते ।

भरद्वाजसंहिता

त्रिभिः प्रजापतेर्भक्तः सप्तभिः शङ्करस्य च ।
विशद्गनेन्द्रसूर्यादिर्जन्मभिर्वैष्णवो भवेत् ॥

पद्मपुराणे उत्तरखण्डे

कुलं पवित्रं जननी कृतार्था वसुन्धरा भाग्यवती च धन्या ।
स्वर्गे स्थितास्ते पितरश्च धन्या येषां कुले वैष्णवनामधेयम् ॥

पद्मपुराणे

बहिर्मुखेन पुत्रेण श्राद्धं यत्पितृणां तथा ।
शता वै पितृदानेन वैष्णवैः सत्कृतांजलैः ॥
आस्फोटयन्ति पितरो नृत्यन्ति च मुहुर्मुहुः ।
मद्वंशे वैष्णवो जातः स नस्त्राता भविष्यति ॥

स्कन्दपुराणे ब्रह्मखण्डे चातुर्मासमा.अ.३१।९-१०

तावद् भ्रमन्ति संसारे पितरः पिण्डतत्पराः ।
यावत्कुले भक्तियुतः सुतो नैव प्रजायते ॥
तावद्द्विजाश्च गर्जन्ति तावद् गर्जति पातकम् ।
तावत्तीर्थान्यनेकानि यावद्भक्तिं न विन्दति ॥
स एव ज्ञानवाँल्लोके योगिनां प्रथमो हि सः ।
महाक्रतूनामाहर्त्ता हरिभक्तियुतो हि सः ॥

भागवत ७।१०।१८

त्रिः सप्तभिः पिता पूतः पितृभिः सह तेऽनघ ।
यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः ॥

भागवत ९।४।६५-६३

ये दारागारपुत्राप्तान् प्राणान् वित्तमिमं परम् ।
हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ।।

श्रीमद्भागवत ११।११।३२–३३

आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान् ।
धर्मान् सन्त्यज्य यः सर्वान् मां भजेत स सत्तमः ।।
ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः ।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ।।

श्रीमद्भगवद्गीता १२।७

तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ।।

गीता अ० ९

यान्ति देवव्रता देवान्पितॄन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ।।२५।।
क्षिप्रं भवति धर्मात्मा शश्वच्छान्ति निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ।।३१।।

उपरोक्त भक्त तो गङ्गादिकों का भी उद्धार कर देते हैं। देखिये वैकुण्ठ में सरस्वतीजी परस्पर झगड़ती हुई गंगा जी को शाप दे दिया कि तेरा पतन हो जाय। बाद में श्रीमन्नारायण जी भी आज्ञा दे डाले कि जा। तब गंगा 'कम्पिता साश्रुनेत्रा च शोकेन च भयेन च'। ब्रह्मवैवर्त्तपुराणे प्रकृतिखं. अ. ६

गंगासे श्रीनारायण जी उद्धार का उपाय बताते हैं कि तुम

चिन्ता मत करो, हमारे भक्त तुम्हारे में स्नान करेंगे तब तुम संसारियों के पाप और शाप से मुक्त हो जाओगी। तो भला भक्त ही देवादि उपरोक्त ऋणों से ऋणी रह जावें यह कैसे हो सकता है?

गंगां प्रति श्रीनारायण उवाच

मन्मन्त्रोपासकानां च सतां स्नानावगाहनात्।
युष्माकं मोक्षणं पापात् पापिस्पर्शनहेतुकात् ॥९१॥
पृथिव्यां यानि तीर्थानि सन्त्यसंख्यानि सुन्दरि।
भविष्यन्ति च पूतानि मद्भक्तस्पर्शदर्शनात् ॥
मन्मन्त्रोपासका भक्ता भ्रमन्ते भारते सति!।
पूतं कर्तुं भारतश्च सुपवित्रां वसुन्धराम् ॥
मद्भक्ता यत्र तिष्ठन्ति पादं प्रक्षालयन्ति च।
तत्स्थानं च महातीर्थं सुपवित्रं भवेद् ध्रुवम् ॥
स्त्रीघ्नो गोघ्नः कृतघ्नश्च ब्रह्मघ्नो गुरुतल्पगः।
जीवन्मुक्तो भवेत् पूतो मद्भक्तस्पर्शदर्शनात् ॥
एकादशी विहीनश्च संध्याहीनोऽपि नास्तिकः।
नरघाती भवेत्पूतो मद्भक्तस्पर्शदर्शनात् ॥
असिजीवी मषीजीवी धावकः शूद्रयाजकः।
वृषवाहो भवेत् पूतो मद्भक्तस्पर्शदर्शनात् ॥९७॥
विश्वासघाती मित्रघ्नो मिथ्यासाक्ष्यप्रदायकः।
न्यासहारी भवेत्पूतो मद्भक्तस्पर्शदर्शनात् ॥
ऋणग्रस्तो वार्द्धुषिको जारजः पुंश्चलीपतिः।
पूतश्च पुंश्चलो पुत्रो मद्भक्तस्पर्शदर्शनात् ॥

शूद्राणां सूपकारश्च देवलो ग्रामयाजकः ।
अदीक्षितो भवेत् पूतो मद्भक्तस्पर्शदर्शनात् ॥
अश्वत्थघातकश्चैव मद्भक्तानां च निन्दकः ।
अनिवेदितभोजी च पूतो मद्भक्तदर्शनात् ॥
देवद्रव्यापहारी च विप्रद्रव्यापहारकः ।
लाक्षालोहरसानां च विक्रेता दुहितुस्तथा ॥
महापातकिनश्चैते शूद्राणां शवदाहकाः ।
भवेयुरेते पूताश्च मद्भक्तस्पर्शदर्शनात् ॥

रामचरित मानस बाल. दो. ३
विधि हरि हर कवि कोविद बानी । कहत साधु महिमा सकुचानी ॥

यद्यपि मेरे भक्त लोकशिक्षार्थ कर्म करते हैं तथापि पूर्व कथित तर्पण, बलिवैश्वदेव गृहस्थ अवश्य ही करें । जो विरक्त हैं उनके वास्ते श्री रामपटल में जगद्गुरु श्री अनन्तानन्दाचार्य जी महाराज जो बताये हैं वही करें ।

परमैकान्ती श्रीरामोपासकोंके लिए संध्योपासना

स्नानं कृत्वा शुद्धासने उपविश्य मूलमन्त्रेण त्रिराचमनं विधाय प्राणायामत्रयं कुर्यात् । तत्र रामिति बीजं मूलमन्त्रं वा जपन् १६पूरकं ६४कुम्भकं ३२रेचकं च कुर्वन् प्राणायामं सर्वत्र विदध्यात् । आदावन्ते तथा मध्ये प्राणायामं समाचरेद् यद्वा प्राणायामत्रयं कृत्वा पश्चान्न्यासं समाचरेत् ।

ततोऽघमर्षणसंध्ययोः संकल्पं विधायादावघमर्षणं कुर्यात् । मूलमन्त्रं पठित्वा दक्षिणहस्ते जलं गृहीत्वा दक्षिणनासारंध्रं संस्पृश्य

दक्षिणावर्त्यभूमौ निक्षिपेत् । 'ॐ नमः' इति मन्त्रेणांजलिना जल मादाय वामहस्तस्थं दक्षिणेनाच्छाद्याष्टवारं 'ॐ ह्रीं जानकीवल्लभाय स्वाहा इति मन्त्रेण मूलेन वा अभिमन्त्र्य पिबेत् पुनस्तथैव त्रिराचम्य पुनश्चांजलिना जलमादाय दक्षिणहस्तस्थं वामेनाच्छाद्य ॐ नमो भगवते रघुनन्दनाय रक्षोघ्नाय विशदाय मधुरप्रसन्नवदनायामित-तेजसेऽमितबलाय रामाय विष्णवे नमः इति मन्त्रेण सकृदभिमन्त्र्य तज्जलं वामहस्ते निक्षिप्यांगुलिविवरगततज्जलबिन्दुभिरात्मानं तेनैव मन्त्रेण मूलमन्त्रेण वाष्टवारं मार्जयित्वा पुनस्तथैव जलमादाय दक्षिण-हस्तस्थं वामेनाच्छाद्य ॐ नमो भगवते० इति सकृदभिमन्त्र्य दक्षिण-नासारंध्रेणाघ्राय तज्जलेन शरीरान्तर्गतसर्वकलुषमाक्षालितमिति तत्कृष्णवर्णं ध्यात्वा वामनाड्या निर्गतं पुनर्हस्तमागतमितिविभाव्य वामभागे कल्पितवज्रशिलायां 'ॐ रः अस्त्राय फट' इति मन्त्रेण गाढमास्फालयेत्, इत्यघमर्षणम् ॥

तत आचम्य 'अपवित्रः पवित्रो वेति' मन्त्रेण मार्जनम् ।

ततो भूतशुद्धिं कुर्यात् । श्रीरामाराधनयोग्यतासिद्ध्यर्थं भूत-शुद्धिमहं करिष्ये, इति संकल्प्य, कूर्ममुद्रया हृदि स्थितं दीपकर्णिका-कारं जीवज्योतिः परतेजसि लीनं विचिन्त्य तत्रैव पृथ्व्यप्तेजो वाय्वा-काशाहंकारमहत्तत्वप्रकृत्यन्तानि तत्वानि लीनान्यात्मनि विचिन्त्य वामकुक्षौ कृष्णवर्णं पापपुरुषं ध्यात्वा प्राणायामं कुर्यात्' पश्चात् यं रं वं शं लं हं, इति बीजान् पठेत् । तत्र 'यमिति शरीरपापशोषणम्' 'रमिति शरीरपापदाहनम्' 'वमिति भस्मोच्चाटनम्' 'शमिति चन्द्रा-मृतवृष्टिकरणम्' तेन देहोत्पत्तिं विभाव्य लमितिबीजेन देहं दृढं

कृत्वा ह्मिति मन्त्रेणाकाशबीजेन देहसुषिराणि विभावयेत् । एवं कं-बीजं षोडशवारं जपेत् । ततो द्वाभ्यामादिबीजाभ्यां पूरकं ततो द्वाभ्यां कुंभकं ततश्च द्वाभ्यां रेचकमिति प्राणायामं कुर्यात् । इति भूतशुद्धिः ।

अथ प्राणप्रतिष्ठा । ॐ अस्य श्री प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि प्राणशक्तिर्देवता आं बीजम् ह्रीं शक्तिः क्रौं कीलकम् प्राणप्रतिष्ठार्थे जपे विनियोगः । इति संकल्पः । तत आचम्य प्राणानायाम्य हृदि हस्तं दत्वा ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं मम प्राणा इहास्थितः ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं मम जीव इहास्थितः । ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं मम वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ततो हृदयं संस्पृश्य द्वादश प्रणवावृत्त्या प्राणान् प्रतिष्ठापयेत् इति प्राणप्रतिष्ठा ॥

ततो जलेन कुशपुष्पान्वितामंजलिमादाय उत्थाय च मूलमन्त्रेण रामगायत्र्या वा श्रीरामार्थमेतदर्घ्यं स्वाहा इत्यर्घ्यत्रयं दत्त्वा सूर्यमण्डलमध्यवर्त्तिने श्रीरामाय निवेदयेत् ॥

"सूर्यमण्डलमध्यस्थं रामं सीतासमन्वितम् ।
नमामि पुण्डरीकाक्षममेयं गुरुतत्परम् " ॥

श्रीरामोपस्थान सनत्कुमारसंहिता

तत्वस्वरूपं पुरुषं पुराणं स्वतेजसा पूरितविश्वमेकम् ।
राजाधिराजं रविमण्डलस्थं विश्वेश्वरं राममहं भजामि ॥
त्रैलोक्यनाथं सरसीरुहाक्षं दयानिधिं द्वन्द्वविनाशहेतुम् ।
महाबलं वेदनिधिं सुरेशं सनातनं राममहं भजामि ॥

विभूतिदं विश्वसृजं विराजं राजेन्द्रमीशं रघुवंशनाथम् ।
अचिन्त्यमव्यक्तमनन्तमूर्त्तिं ज्योतिर्मयं राममहं भजामि ॥
योगीन्द्रसंघैश्च सुसेव्यमानं नारायणं निर्मलमादिदेवम् ।
नतोऽस्मि नित्यं जगदेकनाथमादित्यवर्णं तमसः परस्तात् ॥

"अथ श्रीरामगायत्रीजपविधिः । आदावुदकं हस्ते गृहीत्वा संकल्पमुच्चारयेत् । ॐ अस्य श्रीरामगायत्रीमन्त्रस्य वामदेव ऋषिः गायत्री छन्दः । श्रीसीताप्रियो देवता राम इति बीजम् दाशरथायेति शक्तिः । प्रचोदयादिति कीलकम् श्रीरामप्रीत्यर्थं श्रीरामगायत्रीजपे विनियोगः । इति संकल्पः । पुनराचम्य रामिति बीजेन मूलमन्त्रेण वा प्राणायामं कुर्यात् । ततः श्रीरामगायत्र्यावाहनं कुर्यात् ।

वन्दे विदेहतनयापदपुण्डरीकं कैशोरसौरभसमाहृतयोगिचित्तम् ।
हन्तुं त्रितापमनिशं मुनिहंससेव्यं सन्मानसालिपरिपीतपरागपुञ्जम् ॥
ॐ आवाहयाम्यहं देवि हृदये मम सुन्दरि ।
आगच्छ वरदे देवि त्रिपदे रामवादिनि ॥
गायत्रि छन्दसां माता रामाभिन्ने नमोस्तु ते ।

इत्यावाहनम् । श्री सीतायै स्वाहा इति मन्त्रेणासनं दद्यात् । ततः पाद्यार्घ्याचमनीयपूजादीनि च कुर्यात् ततो मुद्राः प्रदर्शयेत् । 'मुद्रास्तु वैदिकसन्ध्यायां द्रष्टव्याः । अत्रोदकमाहरेद् विनियोगार्थम् । 'ॐअस्य श्रीरामगायत्रीमन्त्रस्य वामदेव ऋषिः । गायत्री छन्दः । श्रीसीताप्रियो देवता । राम इति बीजम् । दाशरथायेति शक्तिः । प्रचोदयादिति कीलकम् । श्रीसीतारामप्रीत्यर्थे गायत्र्या जपे विनियोगः ॥ ॐ वामदेवऋषये नमः शिरसि । गायत्रीछन्दसे

नमो मुखे । सीताप्रियदेवतायै नमो हृदि । रामबीजाय नमो गुह्ये । दाशरथायेति शक्तये नमः पादयोः । प्रचोदयादिति कीलकाय नमः सर्वाङ्गे ॥ अथ रामगायत्री । ॐ दाशरथाय विद्महे । सीताप्रियाय धीमहि तन्नो रामः प्रचोदयात् ।

ॐ दाशरथाय अंगुष्ठाभ्यां नमः । ॐ विद्महे तर्जनीभ्यां नमः । ॐ सीताप्रियाय मध्यमाभ्यां नमः । ॐ धीमहि अनामिकाभ्यां नमः । ॐ तन्नोरामः कनिष्ठिकाभ्यां नमः । ॐ प्रचोदयात करतल-कर पृष्ठाभ्यां नमः । इति करन्यासः ॥

ॐ दाशरथाय हृदयाय नमः । ॐ विद्महे शिरसे स्वाहा । ॐ सीताप्रियाय शिखायै वषट् । ॐ धीमहि कवचाय हुम् । ॐ तन्नो रामो नेत्राभ्यां वौषट् । ॐ प्रचोदयात् अस्त्राय फट् । इति अङ्गन्यासः ॥

ॐ दाशरथाय मूर्ध्नि । ॐ विद्महे भ्रुवोर्मध्ये । ॐ सीताप्रियाय हृदये । ॐ धीमहि नाभौ । ॐ तन्नोरामः कटिदेशे । ॐ प्रचोदयात् पादयोः । इति पदन्यासः ॥

ॐ दाकारं पादतलयोः । ॐ शकारं पादांगुष्ठयोः । ॐ रकारं गुल्फयोः । ॐ थाकारं जंघयोः । ॐ यकारं जान्वोः । ॐ विकार-मूर्वोः । ॐ द्मकारं गुदे । ॐ हेकारं लिंगे । ॐ सीकारं कट्याम् । ॐ ताकारं नाभौ । ॐ प्रकारमुदरे । ॐ याकारं स्तनयोः । ॐ यकारं हृदये । ॐ धीकारं कण्ठे । ॐ मकारं मुखे । ॐ हिकारं नासिकाग्रे । ॐ तकारं नेत्रयोः । ॐ न्नोकारं भ्रुवोर्मध्ये । ॐ राकारं ललाटे । ॐ मःकारं पूर्वदशि । ॐ प्रकारं दक्षिणदिशि । ॐ चोकारं

पश्चिमदिशि । ॐ दकारामुत्तरदिशि । ॐ याकारं मूर्ध्नि । ॐ तकारं सर्वत्र । इत्यक्षरन्यासः ॥ अथ ध्यानम् ।

हस्तद्वयेन कमले धारयन्तीं सलीलया ।
हारनूपुरसंयुक्तां सीतां देवीं विचिन्तये ॥
एवं ध्यात्वा जपेन्मन्त्रं सहस्रं तु दिने दिने ।
अष्टोत्तरशतं वापि त्रिशतं वा तथा क्रमः ।
ॐदाशरथाय विद्महे । सीताप्रियाय धीमहि ।
तन्नो रामः प्रचोदयात् ॥ जपान्ते आचमनम्—
ॐ रामाय नमः । ॐ रामभद्राय नमः । ॐ रामचन्द्रायनमः ॥
अथ षडङ्गन्यासः–ॐ वाक् वाक् । ॐ प्राणः प्राणः ।
ॐ चक्षुः चक्षुः । ततः प्राणायामः । मुद्राः प्रदर्शयेत् ।

अथ विसर्जनम्

ॐ उत्तमे शिखरे देवि ! भूम्यां पर्वतमूर्धनि ।
वैष्णवैः समनुज्ञाता गच्छ देवि ! यथासुखम् ॥
याहि देवि सर्वमातः सूर्यसंकाशवर्चसम् । (वेद)
प्रविश परमात्मानं ज्योतीरूपं नमोस्तु ते ॥

सन्ध्या करने की रीति

प्रातः प्राङ्मुखश्चैव मध्ये तूदङ्मुखस्तथा ।
सायं प्रत्यङ्मुखश्चैव संध्योपासनमाचरेत् ॥

अथ तर्पणम्

आचमन तथा संकल्पके बाद और तर्पण से पूर्व यों कहें—

ॐ श्रीरामः ससखश्चाथ सायुधः सह पार्षदैः ।
सीतया सहितश्चार्घ्यं गृह्णातु सकलेश्वरः ॥

ॐ नमो भगवते विष्णवे चिदचिद्विशिष्टाय वासुदेवाय सर्वात्मने श्रीरामचन्द्राय नमः । रां रामाय नमः श्री रामं संतर्पयामि २८ बार जलाञ्जलि दे ।

ॐ श्रीं सीतायै नमः श्रीसीतां संतर्पयामि ।
ॐ भं भरताय नमः श्रीभरतं संतर्पयामि ।
ॐ लं लक्ष्मणाय नमः श्री लक्ष्मणं संतर्पयामि ।
ॐ शं शत्रुघ्नाय नमः श्रीशत्रुघ्नं संतर्पयामि ।
ॐ शां शार्ङ्गाय नमः श्री शार्ङ्गं संतर्पयामि ।
ॐ शं शरेभ्यो नमः श्रीशरान् संतर्पयामि ।
ॐ विं विमलादिभ्योः नमः श्री विमलादीः संतर्पयामि ।
ॐ हं हनुमते नमः श्री हनुमन्तं संतर्पयामि ।
ॐ श्रीपूर्वाचार्येभ्यो नमः श्रीपूर्वाचार्यान् सन्तर्पयामि ।
ॐ गुं गुरुवे नमः श्री गुरुं संतर्पयामि ।
ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥
ॐ सूर्याय नमः श्रीसूर्यं संतर्पयामि ।।इति।।
शतं विहाय भोक्तव्यं सहस्रं स्नानमाचरेत् ।
लक्षं विहाय दातव्यं कोटिं त्यक्त्वा हरिं स्मरेत् ॥

अथ मन्त्रराज श्रीराममन्त्रजपविधिः

श्रीराममन्त्र जप के नियम् श्रीरामपद्धतिः

आदौ ऋष्यादिकं न्यासं करन्यासं ततः परम् ।
ध्यानं पूजा जपश्चैव ततो नत्त्वा विसर्जनम् ॥

न्यासं विना भवेन्मूकः बधिरो ध्यानवर्जितः ।
देवर्षिच्छन्दसां त्यागाज्जायते वै भुजंगमः ।
तस्मान्न्यासादिकं कर्म विधियुक्तः समाचरेत् ॥

ब्रह्मपुराण अ० २३३।६१ तथा=बृहद्योगियाज्ञवल्क्य स्मृति अ० २-४७

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥

प्रथम पूर्वोक्त रीति से आचमनसंकल्पादि करले....श्रीसीतारामप्रीत्यर्थं श्रीराममन्त्रजपं करिष्ये । ऐसे बोलना चाहिये। इसके पश्चात् आवाहन करे ।

ॐ आगच्छ मन्त्रराज त्वं रामचन्द्रस्वरूपधृक् ।
आवाहयाम्यहं देव तिष्ठ त्वं हृदये मम ।

आवाहनमुद्रां प्रदर्शयेत्

ॐधेनुमुद्रा महामुद्रा शङ्खचक्रगदास्तथा ।
पद्मं योनिश्च कूर्मश्च मत्स्यो वाराहकं शुभाः ॥
सिंहाक्रान्तं महाचापं शरश्चेति त्रयोदश ।
सम्प्रदायोक्तमन्त्राणामावाहने बुधैः स्मृताः ॥

अथ मार्जन श्रीरामपूर्वतापिनी तथा श्रीरामरहस्योपनिषद् २।९० तथा त्रिपाद्विभूतिमहानारायणोपनिषद् अ०७ में इस प्रकार है।

ॐ नमो भगवते रघुनन्दनाय रक्षोघ्नविशदाय मधुरप्रसन्नवदनाय अमिततेजसेऽमितबलाय श्रीरामाय विष्णवे नमः ॐ क्लीं तेजसे रां तारकब्रह्म स्वाहा, इति मन्त्रेण सकृदभिमन्त्र्य तज्जलं हस्ते नि-

क्षिप्य तदंगुलिविवरगतजलबिन्दुभिरात्मानं तेनैव मन्त्रेण मूलेन-वाऽष्टवारं मार्जयित्वा ।

श्रीराममन्त्रराजका विनियोग

ॐ अस्य श्रीरामषडक्षरमन्त्रराजस्य श्री जानकी ऋषिः । गायत्री छन्दः । श्रीरामो देवता रां बीजं नमः शक्तिः । रामाय कीलकम् श्रीसीतारामप्रीत्यर्थे जपे बिनियोगः ।

ॐ जानकीऋषये नमः शिरसि, ॐ गायत्रीछन्दसे नमो मुखे, ॐ श्रीरामदेवतायै नमो हृदि, ॐ रां बीजाय नमो गुह्ये, ॐ नमः शक्तये नमः पादयोः, ॐ रामाय कीलकाय नमः सर्वाङ्गे ।

अथ करन्यासः । विश्वंभरोपनिषद् तथा मैथिलीमहोपनिषद्— ॐ रां रीं रूं रैं रौं रः । ॐ रां अङ्गुष्ठाभ्यां नमः । ॐ रीं तर्जनीभ्यां नमः ॐ रूं मध्यमाभ्यां नमः । ॐ रैं अनामिकाभ्यां नमः । ॐ रौं कनिष्ठिकाभ्यां नमः । ॐ रः करतलकरकरपृष्ठाभ्यां नमः ॥

अथ अङ्गन्यासः—ॐ रां हृदयाय नमः। ॐ रीं शिरसे स्वाहा। ॐ रूं शिखायै वषट् । ॐ रैं कवचाय हुँ । ॐ रौं नेत्राभ्यां वौषट् । ॐ रः अस्त्राय फट् ॥

यहां प्राणयामके साथ श्रीरामजीका ध्यान और रां वा राममन्त्र जपे।

अथ दिग्बन्धनम्

ॐ रां रक्षतु प्राच्याम्। ॐ रां रक्षतु दक्षिणे । ॐ रां रक्षतु प्रतीच्याम् । ॐ रां रक्षतु उदीच्याम्। ॐ रां रक्षतु आग्नेय्याम् । ॐ रां रक्षतु नैऋत्याम्। ॐ रां रक्षतु वायव्याम् । ॐ रां रक्षतु ईशान्याम् ॐ रां रक्षतु ऊर्ध्वम्। ॐ रां रक्षतु अधः ॥

अथ पदन्यासः-

ॐ रां नमो मूर्ध्नि । ॐ रामाय नमो नाभौ । ॐ नमोनमः पादयोः

अथ अक्षरन्यासः

ॐ रां नमो मूर्ध्नि । ॐ रा नमो भ्रुवोर्मध्ये । ॐ मा नमो हृदि ।
ॐ य नमो नाभौ । ॐ न नमो गुह्ये । ॐ 'मः' नमः पादयोः ॥

(विश्वम्भरोनिषद् के प्रारम्भमें तथा श्रीरामार्चामाहात्म्ये अ. २।२)

ॐ रक्ताम्भोजदलाभिरामनयनं पीताम्बरालंकृतं ।
श्यामाङ्गं द्विभुजं प्रसन्नवदनं श्रीसीतया शोभितम् ।
कारुण्यामृतसागरं प्रियगणैर्भ्रात्रादिभिर्भावितं,
वन्दे विष्णुशिवादिसेव्यमनिशं भक्तेष्टदं राघवम् ॥

तत्पश्चात् श्रीरामजी की मानसिक षोडशोपचार पूजा मूलमन्त्र से

(श्रीरामगायत्री, रामरहस्योपनिषद् अ० २।८६ तथा
त्रिपादविभूति महानारायणोपनिषद् अ० ७)

ॐ दाशरथाय विद्महे सीताप्रियाय धीमहि तन्नो रामः प्रचोदयात् । श्रीसीतागायत्री अगस्त्य संहिता अ० २५।२३ में है ।
ॐ जनकजायै विद्महे रामप्रियायै धीमहि तन्नः सीता प्रचोदयात् ॥

इन दोनों गायत्रियों को २४ बार जपे

(अभियुक्तसारावल्याम् अ० ५

बीजार्थसम्प्रदाने च तन्मन्त्रार्थोक्तमन्त्रिणे ।
नमः स्वाहा समष्टिभ्यां प्रयुक्तार्थे समर्पणम् ॥
स्वस्यार्थवाचकः स्वास्तु हाकारस्तन्निरोधकः ।
स्वात्मार्थं ब्रह्मणे युञ्ज्यात्स्वाहार्थोऽयं निगृह्यते ॥

श्री सीताराम जी की एकता

यद्वा शब्दात्मको रामः सीताशब्दार्थरूपिणी ।
यद्वा शब्दात्मिका सीता रामः शब्दार्थरूपवान् ॥

श्रीरामरहस्योपनिषद् अ० २।९४

श्रियं सीतां चतुर्थ्यन्तां स्वाहान्तोऽयं षडक्षरः ॥
लकारं तु समुद्धृत्य लक्ष्मणाय नमोन्तकः ॥९८॥
भकारं तु समुद्धृत्य भरताय नमोन्तकः ॥१०१॥
शंबीजं तु समुद्धृत्य शत्रुघ्नाय नमोन्तकः ॥१०३॥
हं हनूमांश्चतुर्थ्यन्तं हृदन्तो मन्त्रराजकः ॥१०५॥
ॐशां शार्ङ्गाय नमः । त्रिपाद्विभूतिमहाना० अ०७ ॥
ॐ गुं गुरुवे नमः। ॐ शां शार्ङ्गाय नमः। ॐ शं शरेभ्यो नमः ।
ॐभं भरताय नमः। ॐलं लक्ष्मणाय नमः। ॐशं शत्रुघ्नाय नमः ।
ॐहं हनुमते नमः। ॐश्रीं सीतायै स्वाहा। ॐरां रामाय नमः ।

इन सभी मन्त्रों को एक साथ ६ बार तो जपना ही चाहिये । इसके बाद श्री सीतायै स्वाहा, रां रामाय नमः, १०८ बार जपे ।

अगस्त्यसंहिता अ० २५

सीतामन्त्रेण कुर्वीत राममन्त्रजपं तथा ।
उपस्थानादिकाः कार्यास्तत्रैव गतकल्मषैः ॥

प्रथम माला का मन्त्र पढते हुए शिर पर माला चढा कर जपे—

ॐत्वं माले सर्वदेवानां प्रीतिदा शुभदा भव ।
शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥

पुनः—रां रामाय नमः ६००० जपे। इसके बाद पुनः युगल-

मन्त्र १०८ बार। तत्पश्चात् पूर्वोक्त ९ मन्त्र एक साथ जपे। इसके बाद श्रीसीताराम गायत्री १२ जपे।

अगस्त्यसंहिता एवं शिवसंहिता

एवं ज्ञात्वा जपेन्मन्त्रं षटसहस्रं दिने दिने।
अष्टोत्तरसहस्रं वा त्रिशतं वाथ शक्तितः॥
षटसहस्रं सहस्रं वा त्रिशतं शतमेव वा।
जपूतऽशो मन्त्रिणा मन्त्रो नो चेत् प्राप्नोत्यधोगतिम्॥

अथ यथाशक्ति श्रीराममन्त्रद्वय जपे

ॐ श्रीमद्रामचन्द्रचरणौ शरणं प्रपद्ये। श्रीमते रामचन्द्राय नमः॥
कौशलस्मृतिः श्रीसीतामन्त्रद्वय जपे
ॐ श्रीमत्सीतापद्मचरणौ शरणं प्रपद्ये। श्रीमत्यै रामप्रियायै नमः॥

श्री रामचरममन्त्र बा० यु० सर्ग१८।३३

ॐ सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम॥

श्रीसीताचरममन्त्र बा० यु० सर्ग ११६।३३

ॐ पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम।
कार्यं करुणमार्येण न कश्चिन्नापराध्यति॥

इन सभी मन्त्रों को यथाशक्ति जपे। तत्पश्चात् रामगायत्रीसे वा राममन्त्रसे करन्यासादि करके प्राणायाम करे॥
जप लक्षण आदि संध्या प्रकरण में बताया गया है वहीं देखें।
मनोमध्ये स्थितो मन्त्रो मन्त्रमध्ये स्थितम्मनः।

मनोमन्त्रसमायुक्तमेतच्च जपलक्षणम् ॥
पूर्वमर्थानुसंधानं मन्त्रानुसंहितिः परा ।
नित्यमुक्तमुमुक्षूणां कर्तव्योऽयं सनातनः ॥

'श्रीवैष्णवमताब्जभास्कर' 'स्कन्दपुराण और विश्वम्भरोपनिषद् में मन्त्रद्वय देखो ।

द्वयाख्यं रामचन्द्रस्य मन्त्ररत्नमनुत्तमम् ।
पञ्चविंशाक्षरं विद्वान् स याति परमां गतिम् ॥

यो दाशरथेर्द्वयाख्यं मन्त्राणां प्रवरं मन्त्ररत्नमधीते स सर्वान्कामानश्नुते ॥

श्रीरामरहस्योपनिषद् अ० २।३८

किं मन्त्रैर्बहुभिर्विनश्वरफलैरायाससाध्यैर्वृथा
किञ्चिल्लोभवितानमात्रविफलैः संसारदुःखावहैः ।
एकः सन्नपि सर्वमन्त्रफलदो लोभादिदोषोज्झितः
श्रीरामः शरणं ममेति सततं मन्त्रोऽयमष्टाक्षरः ॥

'श्रीसीता शरणं मम' यह श्रीसीताऽष्टाक्षर मंत्र वशिष्टसंहिता में है ।

अनन्यभक्त विसर्जन नहीं करते हैं । तथापि मन्त्र यों है ।

ॐ गच्छ गच्छ महाबाहो मन्त्ररूपात्मक प्रभो ।
विसर्जयामि देवेश क्षमस्व रघुनन्दन ॥

अथ–विसर्जनमुद्रा

वैजयन्ती पाञ्चजन्यं कौमोदकी सुदर्शनः ।
पङ्कजन्तु श्रीवत्सश्च कौस्तुभश्च शरस्तथा ॥
योनिश्च सौरभेयी च धनुर्मुद्रा हि मोक्षदा ।
द्वादशैतास्तु मुद्राश्च जपान्ते दर्शयेद् बुधः ॥

जपसमर्पण तथा नमस्कार

ॐ रामभद्र दयासिंधो राम राजीवलोचन ।
मया कृतं जपं सर्वं स्वीकुरुष्व कृपानिधे ॥
यदक्षरं पदभ्रष्टं मात्राहीनञ्च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद रघुनन्दन ॥
ॐ रामाय नमः ॐ रामभद्राय नमः ॐ रामचन्द्राय नमः ॥

इत्याचमनम् ॥

आसन से उठने पर ॐ नमः पृथीव्यै कहकर पृथीवी को नमस्कार करले ॥

श्रीराममन्त्र का परत्व तथा श्रीरामजीका श्रेष्ठत्व
श्री रामोत्तरत्तापनीउपनिषद्–शंकरजीकी तपस्या

श्रीरामस्य मनुं काश्यां जजाप वृषभध्वजः ।
मन्वन्तरसहस्रैस्तु जपहोमार्चनादिभिः ॥
ततः प्रसन्नो भगवाञ्छ्रीरामः प्राह शङ्करम् ।
वृणीष्व यदभीष्टं तद् दास्यामि परमेश्वर ॥
अथ सच्चिदानन्दात्मानं श्रीराममीश्वरः प्रपच्छ—
मणिकर्ण्यां मम क्षेत्रे गङ्गायां वा तटे पुनः ।
म्रियेत देही तज्जन्तोर्मुक्तिर्नाऽतो वरान्तरम् ॥

स होवाच श्रीरामः

क्षेत्रेऽस्मिंस्तव देवेश यत्र कुत्रापि वा मृताः ।
कृमिकीटादयोऽप्याशु मुक्ताः सन्तु न चान्यथा ॥
अविमुक्ते तव क्षेत्रे सर्वेषां मुक्तिसिद्धये ।

अहं सन्निहितस्तत्र पाषाणप्रतिमादिषु ॥
क्षेत्रेस्मिन् योऽर्चयेद्भक्त्या मन्त्रेनानेन मां शिव ।
ब्रह्महत्यादिपापेभ्यो मोक्षयिष्यामि मा शुचः ॥
त्वत्तो वा ब्रह्मणो वापि ये लभन्ते षडक्षरम् ।
जीवन्तो मन्त्रसिद्धाः स्युर्मुक्ता मां प्रप्नुवन्ति ते ॥
मुमूर्षोर्दक्षिणे कर्णे यस्य कस्यापि वा स्वयम् ।
उपदेक्ष्यसि मन्मन्त्रं स मुक्तो भविता शिव ॥

स्कन्दपु. निर्वाणखण्ड द्वात्रिंशत्तमोध्यायः ३२ श्रीरामगीता तथा पद्मपुराण उत्तरखण्ड अ० २४३।३९

शिव उवाच

आवां राम ! जगत्पूज्यौ मम पूज्यौ सदा युवाम् ।
त्वन्नामजापिनी गौरी त्वन्मन्त्रजपवानहम् ॥
मुमूर्षोर्मणिकर्ण्यान्तु अर्द्धोदकनिवासिनः ।
अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम् ॥
अतस्त्वं जानकीनाथ परंब्रह्माऽसि निश्चितम् ।
त्वन्मायामोहितास्सर्वे न त्वां जानन्ति तत्वतः ॥

रामोत्तरतापिनी

अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रूद्रस्तारकं ब्रह्म व्याचष्टे येनासौ अमृतीभूत्वा मोक्षी भवति । तस्मादविमुक्तमेव निषेवेत अविमुक्तं न विमुञ्चेत् । एवमेवैतद्याज्ञवल्क्य । अथ हैनं भरद्वाजः प्रपच्छ याज्ञवल्क्यं किं तारकं किं तारयतीति । स होवाच याज्ञवल्क्यस्तारकं दीर्घानलं विन्दुपूर्वकं दीर्घानलं पुनर्माय नमश्चन्द्राय नमो भद्राय नम

इत्येतद्ब्रह्मात्मिकाः सच्चिदानन्दाख्या इत्युपासितव्यम् ।

अथ हैनं भरद्वाजो याज्ञवल्क्यमुपसमेत्योवाच श्रीराममन्त्रराजस्य माहात्म्यमनुब्रूहीति ।

स होवाच याज्ञवल्क्यः

स्वप्रकाशः परञ्ज्योतिः स्वानुभूत्यैकचिन्मयः ।
तदेव रामचन्द्रस्य मनोराद्यक्षरः स्मृतः ॥१॥
अखण्डैकरसानन्दस्तारकब्रह्मवाचकः ।
रामायेति सुविज्ञेयः सत्यानन्दचिदात्मक ॥२॥
नमः पदं सुविज्ञेयं पूर्णानन्दैककारणम् ।
सदा नमन्ति हृदये सर्वे देवा मुमुक्षवः ॥३॥

य एवं मन्त्रराजं श्रीरामचन्द्रषडक्षरं नित्यमधीते । सोऽग्निपूतो भवति । स वायुपूतो भवति । स आदित्यपूतो भवति । स सोमपूतो भवति । स रुद्रपूतो भवति । स सर्वैर्देवैर्ज्ञातो भवति । स सर्वक्रतुभिरिष्टवान् भवति । तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि सफलानि भवन्ति । श्रीरामचन्द्रमनुस्मरणेन गायत्र्याः शतसहस्राणि जप्तानि फलानि भवन्ति । प्रणवानामयुतकोटिजपाद् भवति । दश पूर्वान् दशोत्तरान्पुनाति । स पंक्तिपावनो भवति । स महान्भवति । सोऽमृतत्वं च गच्छति ॥

अत्रैते श्लोका भवन्ति ।

गाणपत्येषु शैवेषु शाक्तसौरेष्वभीष्टदः ।
वैष्णवेष्वपि सर्वेषु राममन्त्रः फलाधिकः ॥४॥
गाणपत्यादिमन्त्रेषु कोटिकोटिगुणाधिकः ।

मन्त्रस्तेष्वप्यनायासफलदोऽयं षडक्षरः ॥५॥
षडक्षरोऽयं मन्त्रः स्यात् सर्वाघौघनिवारणः ।
मन्त्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः ॥६॥
कृतं दिने यद्दुरितं पक्षमासर्तुवर्षजम् ।
सर्वं दहति निःशेषं तूलराशिमिवानलः ॥७॥
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ।
स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च ॥८॥
कोटिकोटिसहस्राणि उपपातकजान्यपि ।
सर्वाण्यपि प्रणश्यन्ति राममन्त्रानुकीर्तनात् ॥९॥
भूतप्रेतपिशाचाद्याः कूष्माण्डब्रह्मराक्षसाः ।
दूरादेव पलायन्ते राममन्त्रप्रभावतः ॥१०॥
ऐहलौकिकमैश्वर्यं स्वर्गाद्यं पारलौकिकम् ।
कैवल्यं भगवत्त्वं च मन्त्रोऽयं साधयिष्यति ॥११॥
ग्रामारण्यपशुघ्नत्वं सञ्चितं दुरितं च यत् ।
मद्यपानेन यत्पापं तदप्याशु विनाशयेत् ॥१२॥
अभक्ष्यभक्षणोत्पन्नं मिथ्याज्ञानसमुद्भवम् ।
सर्वं विलीयते राममन्त्रस्यास्यैव कीर्तनात् ॥१३॥
श्रोत्रियस्वर्णहरणाद्यच्च पापमुपस्थितम् ।
रत्नादेश्चापहारेण तदप्याशु विनाशयेत् ॥१४॥
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं हत्वा च किल्बिषम् ।
सञ्चिनोति नरो मोहाद्यद्यत्तदपि नाशयेत् ॥१५॥
मातरं मोहादगम्याश्चैव योषितः ।
गत्वापि

उपास्यानेन मन्त्रेण रामस्तदपि नाशयेत् ॥१६॥
महापातकपापिष्ठसङ्गत्या सञ्चितं च यत् ।
नाशयेत्तत्कथालापशयनासनभोजनैः ॥१७॥
पितृमातृवधोत्पन्नं बुद्धिपूर्वमघं च यत् ।
तदनुष्ठानमात्रेण सर्वमेतद्विलीयते ॥१८॥
यत्प्रयागादितीर्थोक्तप्रायश्चित्तशतैरपि ।
नैवापनोद्यते पापं तदप्याशु विनाशयेत् ॥१९॥
पुण्यक्षेत्रेषु सर्वेषु कुरुक्षेत्रादिषु स्वयम् ।
बुद्धिपूर्वमघं कृत्वा तदप्याशु विनाशयेत् ॥२०॥
कृच्छ्रैस्तप्तपराकाद्यैर्नानाचान्द्रायणैरपि ।
पापं च नापनोद्यं यत्तदप्याशु विनाशयेत् ॥२१॥
आत्मतुल्यसुवर्णादि दानैर्बहुविधैरपि ।
किञ्चिदप्यपरिक्षीणं तदप्याशु विनाशयेत् ॥२२॥
अवस्थात्रितयेष्वेव बुद्धिपूर्वमघं च यत् ।
तन्मन्त्रस्मरणेनैव निःशेषं प्रविलीयते ॥२३॥
अवस्थात्रितयेष्वेव मूलबन्धमघं च यत् ।
तत्तन्मन्त्रोपदेशेन सर्वमेतत् प्रणश्यति ॥२४॥
आब्रह्मबीजदोषाश्च नियमातिक्रमोद्भवाः ।
स्त्रीणां च पुरुषाणां च मन्त्रेणानेन नाशिताः ॥२५॥
येषु येष्वपि देशेषु रामभद्र उपास्यते ।
दुर्भिक्षादिभयं तेषु न भवेत्तु कदाचन ॥२६॥
शान्तः प्रसन्नवदनो ह्यक्रोधो भक्तवत्सलः ।

अनेन सदृशो मन्त्रो जगत्स्वपि न विद्यते ॥२७॥
सम्यगाराधितो रामः प्रसीदत्येव सत्वरम् ।
ददात्यायुष्यमैश्वर्यमन्ते विष्णुपदं च यत् ॥२८॥

तदेतदृचाभ्युक्तम्

ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः यस्तन्न वेद किमृचाकरिष्यति य इत्तद्विदुस्त इमे समासते । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदम् ॥

श्रीराममन्त्रार्थः श्रीरामरहस्योपनिषद् अ० ५

सनकाद्या मुनयो हनुमन्तं प्रपच्छुः । श्रीराममन्त्रार्थमनुब्रूहीति ।

हनूमान्होवाच ।

सर्वेषु राममन्त्रेषु मन्त्रराजः षडक्षरः ।
एकधाथ द्विधा त्रेधा चतुर्धा पञ्चधा तथा ॥१॥
षट्सप्तधाष्टधा चैव बहुधायं व्यवस्थितः ।
षडक्षरस्य माहात्म्यं शिवो जानाति तत्त्वतः ॥२॥
श्रीराममन्त्रराजस्य सम्यगर्थोऽयमुच्यते ।
नारायणाष्टाक्षरे च शिवपञ्चाक्षरे तथा ॥३॥
सार्थकार्णद्वयं रामो रमन्ते यत्र योगिनः ।
रकारो वह्निवचनः प्रकाशः पर्यवस्यति ॥४॥
सच्चिदानन्दरूपोऽस्य परमात्मार्थ उच्यते ।
व्यञ्जनं निष्कलं ब्रह्म प्राणो मायेति च स्वरः ॥५॥
व्यञ्जनैः स्वरसंयोगं विद्धि तत्प्राणयोजनम् ।

रेफे ज्योतिर्मये तस्मात्कृतमाकारयोजनम् ॥६॥
मकारोऽभ्युदयार्थत्वात् समायेति च कीर्त्यते ।
सोऽयं बीजं स्वकं यस्मात् समायं ब्रह्म उच्यते ॥७॥
सबिन्दुः सोऽपि पुरुषः शिवसूर्येन्दुरूपवान् ।
ज्योतिस्तस्य शिखारूपं नादः सप्रकृतिर्मतः ॥८॥
प्रकृतिः पुरुषश्चोभौ समाया ब्रह्मणः स्मृतौ ।
बिन्दुनादात्मकं बीजं वह्निसोमकलात्मकम् ॥९॥
अग्निषोमात्मकं रूपं रामबीजे प्रतिष्ठितम् ।
यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः ॥१०॥
तथैव रामबीजस्थं जगदेतच्चराचरम् ।
बीजोक्तमुभयार्थत्वं रामनामनि दृश्यते ॥११॥
बीजं मायाविनिर्मुक्तं परं ब्रह्मेति कीर्त्यते ।
मुक्तिदं साधकानां च मकारो मुक्तिदो मतः ॥१२॥
मारूपत्वादतो रामो भुक्तिमुक्तिफलप्रदः ।
आद्यो रा तत्पदार्थः स्यान्मकारस्त्वम्पदार्थवान् ॥१३॥
तयोः संयोजनमसीत्यर्थे तत्त्वविदो विदुः ।
नमस्त्वमर्थो विज्ञेयो रामस्तत्पदमुच्यते ॥१४॥
असीत्यर्थे चतुर्थी स्यादेवं मन्त्रेषु योजयेत् ।
तत्त्वमस्यादिवाक्यं तु केवलं मुक्तिदं यतः ॥१५॥
भुक्तिमुक्तिप्रदं चैतत्तस्मादप्यतिरिच्यते ।
मनुष्वेतेषु सर्वेषामधिकारोऽस्ति देहिनाम् ॥१६॥
मुमुक्षूणां विरक्तानां तथा चाश्रमवासिनाम् ।

प्रणवत्वात्सदा ध्येयो यतीनां च विशेषतः ॥१७॥
राममन्त्रार्थविज्ञानी जीवन्मुक्तो न संशयः ।

य इमामुपनिषदमधीते सोऽग्निपूतो भवति स वायुपूतो भवति सुरापानात् पूतो भवति । स्वर्णस्तेयात् पूतो भवति । ब्रह्महत्यायाः पूतो भवति । स राममन्त्राणां कृतपुरश्चरणो रामचन्द्रो भवति ॥इति॥

पुरश्चरणविधि तत्रैव अ०४

सनकाद्या मुनयो हनुमन्तं पप्रच्छुः—
श्री राममन्त्राणां पुरश्चरणविधिमनुब्रूहीति ।

हनुमान् होवाच

नित्यं त्रिषवणस्नायी पयोमूलफलादिभुक् ।
अथवा पायसाहारो हविष्यान्नाद एव वा ॥१॥
षड्रसैश्च परित्यक्तः स्वाश्रमोक्तविधिं चरन् ।
वनितादिषु वाक्कर्ममनोभिर्निःस्पृहः शुचिः ॥२॥
भूमिशायी ब्रह्मचारी निष्कामो गुरुभक्तिमान् ।
स्नानपूजाजपध्यानहोमतर्पणतत्परः ॥३॥
गुरूपदिष्टमार्गेण ध्यायन् राममनन्यधीः ।
सूर्येन्दुगुरुदीपादिगोब्राह्मणसमीपतः ॥४॥
श्रीरामसन्निधौ मौनी मन्त्रार्थमनुचिन्तयन् ।
व्याघ्रचर्मासने स्थित्वा स्वस्तिकाद्यासनक्रमात् ॥५॥
तुलसीपारिजातश्रीवृक्षमूलादिकस्थले ।
पद्माक्षतुलसीकाष्ठवैजन्तिकृतमालया ॥६॥

धात्रीमालया मन्त्री मनसैव मनुं जपेत् ।
अभ्यर्च्य वैष्णवे पीठे जपेदक्षरलक्षकम् ॥७॥
तर्पयेत्तद्दशांशेन पायसात्तद्दशांशतः ।
जुहुयादग्नौ घृतेनैव भोजयेत्तद्दशांशतः ॥८॥
ततः पुष्पाञ्जलिं मूलमन्त्रेण विधिवच्चरेत् ।
ततः सिद्धमनुर्भूत्वा जीवन्मुक्तो भवेन्मुनिः ॥९॥
अणिमादिर्भजत्येनं यूनं वरवधूरिव ।
ऐहिकेषु च कार्येषु महापत्सु च सर्वदा ॥१०॥
नैव योज्यो राममन्त्रः केवलं मोक्षसाधकः ।
ऐहिके समनुप्राप्ते मां स्मरेद्रामसेवकम् ॥११॥
यो रामं संस्मरेन्नित्यं भक्त्या मनुपरायणः ।
तस्याहमिष्टसंसिद्ध्यै दीक्षितोऽस्मि मुनीश्वराः ॥
वांछितार्थं प्रदास्यामि भक्तानां राघवस्य तु ।
सर्वथा जागरूकोऽस्मि रामकार्यधुरन्धरः ॥१३ इति॥

पुलस्त्यसंहिता

यथा करण्डे रत्नं हि गुप्तमज्ञैर्न दृश्यते ।
तद्वन्मंत्राश्च वेदाश्च रकारेषु व्यवस्थिताः ॥
रकाराज्जायते स्वर्ग अकारान्मर्त्यसंभवः ।
रसातलं मकारेण बीजात् त्रैलोक्यसंभवः ॥
रामित्येकाक्षरं ब्रह्म कारणं प्रणवस्य च ।
तस्माद् ब्रह्मा हरिः शम्भुर्योगिनः समुपासते ॥
प्रणवं केचिदाहुर्वै बीजं श्रेष्ठं तथा परे ।

तत्तु ते नामवर्णाभ्यां सिद्धिमाप्नोति मे मतम् ॥

रां बीजसे ओम् की सिद्धि

राम् इत्थं र् आ म् पृथक्कृते । "पृषोदरादीनि यथोपदिष्टम्" इति सूत्रेण सिंहादिवद्वर्णविपर्य्यये आ र म् इति जातम् । तत्र रुसम्बन्धिरेफस्याभावेऽपि छान्दसत्वाद्धशि चेत्युत्वे आद्गुण इति गुणे ओमिति सिध्यति ।

गुह्योद्धारकतन्त्रे शिवजी पार्वतीजी से

कारणं प्रणवस्यापि रामनाम जगद्गुरुः ।
तस्माद् ध्येयं सदा चित्ते यतिभिः शुद्धचेतनैः ॥

श्रीरामनामके अंशांश से प्रणव की उत्पत्ति को शिवजी कहते हैं ।

महारामायण

रामनाम्नः समुत्पन्नः प्रणवो मोक्षदायकः ।
रूपं तत्त्वमसेश्चापि वेदतत्त्वाधिकारिणः ॥३४॥
अंशांशौ राममन्त्रश्च त्रयः सिद्धा भवन्ति हि ।
बीजमोंकार सोऽहं च सूत्रैरुक्तमिति श्रुतिः ॥२६॥
रकारगुरुराकारस्तथावर्णविपर्य्ययः ।
मकारं व्यञ्जनं चैव प्रणवं च विधीयते ॥३३॥
तस्यासवर्णितं मत्वा प्रणवे नादरूपधृक् ।
अन्तर्भूतो भवेद्रेफः प्रणवो मोक्षदायकः ॥
रूपं तत्वमसेश्चासौ वेदतत्वाधिकारिणः ।
रकारस्तत्पदो ज्ञेयस्त्वंपदोऽकार उच्यते ॥
मकारासिपदं प्रोक्तं तत्त्वमसि सुलोचने ।
ब्रह्मेति तत्पदं विद्धि त्वंपदो जीवनिर्मलः ।

ईश्वरोऽसिपदप्रोक्त ततो माया प्रवर्त्तते ।
इत्यादयो महामन्त्रा वर्तन्ते शतकोटयः ॥
आत्मा तेषां च सर्वेषां रामनाम प्रकाशकः ।

रामपूर्वतापिनी उपनिषद् २

स्वभूर्ज्योतिर्मयोऽनन्तरूपी स्वेनैव भासते ।
जीवत्वेनेदमों यस्य सृष्टिस्थितिलयस्य च ॥
कारणत्वेन चिच्छक्त्या रजःसत्वतमोगुणैः ।
यथैववटबीजस्थः प्राकृतश्च महाद्रुमः ॥
तथैव रामबीजस्थं जगदेतच्चराचरम् ।
रेफारूढा मूर्तयः स्युः शक्तयस्तिस्र एव चेति ॥
ब्रह्मादीनां वाचकोऽयं मन्त्रोऽन्वर्थादिसंज्ञकः ।
जप्तव्यो मन्त्रिणा नैवं विना देवः प्रसीदति ॥११॥
क्रियाकर्मेज्यकर्तॄणामर्थं मन्त्रो वदत्यथ ।
मननान्त्राणनान्मन्त्रः सर्ववाच्यस्य वाचकः ॥१२॥

स्कन्दपु० निर्वाणखण्डे शिववाक्यम्

तवांशोऽहं हरिर्ब्रह्मा देवाः सर्वे चराचराः ।
जगत्पूज्यो ह्यहं तस्य उमया सह चानया ॥
आवां राम जगत्पूज्यावावयोश्च युवां सदा ।
त्वन्नाम जापिता गौरी त्वन्नामजपवानहम् ॥
मुमुर्षोर्मणिकर्णिक्यामर्द्धोदकनिवासिनाम् ।
अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम् ॥
श्रीरामरामरामेति ह्येतत्तारकमुच्यते ।

अतस्त्वं जानकीनाथ परं ब्रह्म सुनिश्चितम् ॥

स्कन्दपु. ब्रह्मख. सेतुमा. अ० १८।१६ तथा अ० ४६।४३

तारकब्रह्मणे तुभ्यं लक्ष्मणाग्रज ते नमः ।
रक्षःसंहारिणे तुभ्यं नमो रावणमर्द्दिने ॥
कोदण्डधारिणे तुभ्यं सर्वरक्षा विधायिने ।
राजेन्द्राय नमस्तुभ्यं जानकीपतये नमः ।
तारकब्रह्मणे तुभ्यं नमो राजीवलोचन ॥

सनत्कुमारसंहिता तथा बृहद्ब्रह्मसंहिता पाद २।अ० ७

श्रीरामेतिपरं जाप्यं तारकं ब्रह्मसंज्ञकम् (वाचकम्)।
ब्रह्महत्यादिपापघ्नमितिवेदविदो विदुः ॥

सदाशिवसंहिता

श्रीराम तारकं मन्त्रं सर्वांगसहितं तदा ।
उपदिष्टो मुनिस्सम्यक्.... .... ॥

बृहद्ब्रह्मसंहिता पाद २।अ० ७

श्रीराममन्त्रराजस्य महात्म्यं गिरिजापतिः ।
जानाति भगवान् शंभुर्ज्वलत्पावकलोचनः ॥
रामो ङेन्तो वह्निपूर्वो नमोन्तः स्यात् षडक्षरः ।
तारको मन्त्रराजोऽयं संसारविनिवर्त्तकः ॥
रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥
रामेति किल वर्णाभ्यां ब्रह्मेति प्रतिपाद्यते ।
कारणं सर्वभूतानामवधिः परिकथ्यते ॥

षडक्षरो वन्हिपूर्वस्तारकस्त्वभिधीयते ।
महापातकिनां पापदहने दहनोपमः ॥

स्कन्दपु. चातुर्मास मा. अ० २४।४६

रमते सर्वभूतेषु स्थावरेषु चरेषु च ।
अन्तरात्मस्वरूपेण यच्च रामेति कथ्यते ॥

वृद्धहारीतस्मृति अ० ३।२३२

षडक्षरं दाशरथेस्तारकं ब्रह्म गद्यते ।
सर्वैश्वर्यप्रदं नणां सर्वकर्म फल प्रदम् ॥
एतमेव परं मन्त्रं ब्रह्मरूद्रादिदेवता: ॥२३३॥
ऋषयश्च महात्मानो मुक्ता जप्त्वा भवाम्बुधौ ॥
एष वै सर्व लोकानामैश्वर्यस्यैव कारणम् ॥२३६॥
इममेव जपन्मंत्रं रुद्रस्त्रिपुरघातक ॥
ब्रह्महत्यादिनिर्मुक्तः पूज्यमानोऽभवत्सुरैः ।
अद्यापि रुद्रः काश्यां तु सर्वेषां त्यक्तजीविनाम् ॥२३७॥
दिशत्येतन्महामन्त्रं तारकंब्रह्मनामकम् ।
तस्य श्रवणमात्रेण सर्व एव दिवं गताः ॥२३८॥
रां रामाय नमो ह्येष तारकब्रह्मनामकः ।
नाम्नां विष्णोः सहस्राणां तुल्य एव महामनुः ॥२३९॥
अनन्ता भगवन्मन्त्रा नानेन तु समाकृताः ।
श्रियो रमणसामर्थ्यात् सौन्दर्यगुणगौरवात् ॥२४०॥

सनत्कुमारसंहिता वेदव्यास उवाच

इदं सत्यमिदं सत्यं सत्यमेतदिहोच्यते ॥

रामः सत्यं परं ब्रह्म रामात् किञ्चिन्न विद्यते ।
तस्माद्रामस्वरूपत्वात् सत्यं सत्यमिदं जगत् ॥९२॥

श्री शुकसंहिता

मन्त्रोऽयं रसनास्पृसेव फलति श्रीरामनामात्मकः ।
नातः परतरं वस्तु श्रुतिसिद्धान्तगोचरम् ।
दृष्टं श्रुतं मया क्वापि सत्यं सत्यं वचो मम ॥

यजुर्वेद अ० ३२।३ तथा श्वेताश्वतरोपनिषद्

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ।

तदेव पद्मपुराणे

रुद्रो दिशति यन्मन्त्रं यस्य नाम महद्यशः ।
तस्य नास्त्युपमा क्वापि तं रामं राघवं भजे ॥

पद्मपु. पातालखं. अ० ३०।२६ महादेव उवाच

अहं हि वैष्णवो जातो विष्णोर्भक्तिप्रसादतः ।
काश्यां निवसतां ह्यत्र रामरामेति संजपन् ।
तेन पुण्यादियोगेन शिवो वै नात्र संशयः ॥

श्री मानसरामायण बालकाण्ड दो. २६

नाम प्रसाद शंभु अविनाशी। साज अमंगल मंगल राशी॥

स्कन्दपुराणे काशीखं

पेयं पेयं श्रवणपुटके रामनामाभिरामं
ध्येयं ध्येयं मनसि सततं तारकं ब्रह्मरूपम् ।
जल्प्यं जल्प्यं प्रकृतिविकृतौ प्राणिनां कर्णमूले
काशीवीथ्यामटति जटिलः कोऽपि काशीनिवासी ॥

शिवसंहिता अ० २।१४

रामनाम्ना शिवः काश्यां भूत्वा पूतः शिवः स्वयम् ।
सा नस्तारयते जीवराशीन्काशीश्वरस्सदा ।।

आनन्द रामायण यात्राकाण्ड सर्ग २।१५

द्वयक्षरे याचमानाया मह्यं शेषे ददौ हरिः ।
उपदिशाम्यहं काश्यां तेऽन्तकाले नृणां श्रुतौ ॥१५॥
रामेति तारकं मन्त्रं तमेव विद्धि पार्वति ॥१६॥

ना० प० बृहद्ब्रह्मसंहिता

रामो ङेन्तो वन्हिपूर्वो नमोऽन्त स्यात्षडक्षरः ।
तारको मन्त्रराजोऽयं संसारविनिवर्त्तकः ॥

पद्मपुराण कपिल गीता में

ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
तस्य मध्ये स्थितं तत्त्वं प्रदर्शयति सद्गुरुः ॥

महारामायण सर्ग ५२।४०

नारायणादिनामानि कीर्तितानि बहून्यपि ।
आत्मातेषां च सर्वेषां रामनाम प्रकाशकः ।।

श्री नारायणाष्टाक्षर मन्त्र से, ओंकार हटा देने पर अष्टाक्षर ही नही रहता इसी प्रकार ब्रह्म गायत्री में से ओङ्कार हटा देने पर गायत्री चौविस अक्षर नहीं रहती है । इसमें भी ॐ प्रधान है। जो महाशय ॐ से काशी में मुक्ति सिद्ध करना चाहते हैं । वे महाभारत या पद्मपुराण अन्तर्गत विष्णुसहस्र नाम देखलें। उन सहस्र नामों में प्रणव ॐ नाम को भी श्रीशिवजी गौण बतादिये ।

यदि श्रीरामनाम से ओङ्कार श्रेष्ठ होता तो शिवजी ॐ को क्यों नहि बताये वे कहते हैं ।

राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥
जपतः सर्ववेदांश्च सर्वमन्त्रांश्च पार्वति ।
तस्मात्कोटिगुणं पुण्यं रामनाम्नैव लभ्यते ॥

पद्मपुराण

लौकिका वैदिकाः शब्दा ये केचित्सन्ति पार्वति ।
नामानि रामचन्द्रस्य सहस्रं तेषु वाधिकम् ॥

और भी पद्मपुराण उत्तरखं० अ० ७१।२१–३४॥ तथा अ० ७५।१९ एवं अ० १५०।६ से ११ तक ॥ स्वर्गखं० अ० ३३।३२–४७॥ पातालखं० अ० १०५।११ से राम नाम का माहात्म्य तथा शिवजीके हृदय में श्रीरामजीका निवास देखिये।

पद्मपु० उत्तरखं० अ० १।५४

महेश्वरकृतां भक्तिं विष्णुना च महात्मना ।
अद्यापि काश्यां जपति महारुद्रो ह्यनामयम् ॥

पद्मपु० उ० अ० १५०।१० शिवजी पार्वतीसे

काश्यां हि निवसन्नित्यं श्रीरामं कमलेक्षणम् ।
स्मरामि सततं देवि ! भक्त्या च विधिपूर्वकम् ॥

वाल्मिकिसंहिता अ० २

रां रामाय नमः राममन्त्रं यूयमवेत वै ।
यस्य श्रवणमात्रेण कोटि जन्मकृतान्यपि ॥

पापानि च विनश्यन्ति अनेनैव महर्षयः ।
राममन्त्रविहीनानां शुद्धकर्मवतामपि ॥
विफला हि क्रियाः सर्वा इति वेदेषु कथ्यते ।
वृथा धर्मो वृथा कर्म वृथा जीवनमस्ति च ॥
राममन्त्रविहीनस्य वेदविद्याविदोऽपि च ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चापि गुणान्विताः ॥
श्रद्धया परया युक्तास्ते च तस्याधिकारिणः ।

'मुक्तिकोपनिषद्' श्रीरामजी

काश्यां तु ब्रह्मनालेऽस्मिन्मृतो मत्तारमाप्नुयात् ।
पुनरावृत्तिरहितां मुक्तिं प्राप्नोति मानवः ॥
यत्र कुत्रापि वा काश्यां मरणे स महेश्वरः ।
जन्तोर्दक्षिणकर्णे तु मत्तारं समुपादिशेत् ॥
निर्धूताशेषपापौघे मत्सारूप्यं भजत्ययम् ।
सैव सालोक्यसारूप्यमुक्तिरित्यभिधीयते ॥

जिस तरह अश्वपति की तपस्या से प्रसन्न होकर कन्या होना गायत्री जी स्वीकार कर लीं । वे ही गायत्री सावित्री के नाम से प्रसिद्ध हो सत्यवान की स्त्री हुईं (ब्रह्मवैवर्त्त पु. अ० २३) में देखो । उसी तरह श्रीसीताजी श्रीजनकजी की पुत्री हुईं (जानकी चरितामृत देखिये) और श्री रामजी दशरथजी के पुत्र हुए । त्रेता के पूर्व श्रीराममन्त्र का प्रचार स्वयं रामजी कर रहे हैं । शिवजी को देकर । उसका काल हिण्याक्ष के शब्दों द्वारा प्रह्लादजी के प्रति । पद्म पुराण उत्तरखं. अ० २३८।३० ।

त्रिपुण्डधारणं कृत्वा भस्मना दैत्यपूजितम् ।
पूजयस्व महादेवं पाशुपत्योक्तमार्गतः ॥३०॥

अब पुनः देखिये कि शिवजी इस भेष को कब धारण किये हैं और श्रीरामजीका ध्यान और श्रीरामतारक मन्त्र उनको कब मिला है ।

पद्मपुराण उत्तरखं० अ० २३५ पार्वत्युवाच

भगवन्परमं गुह्यं पृच्छामि सुरसत्तम ! ।
मयि प्रीत्या समाचक्ष्व संशयो वर्त्तते भृशम् ॥१५॥
कपालभस्मचर्मास्थिधारणं श्रुतिगर्हितम् ।
तत्त्वया धार्यते देव ! गर्हितं केन हेतुना ॥१६॥
स्त्रीचापल्येन देवेश ! पृच्छामि त्वां महामते ! ।
महानुभावकथितं न कर्त्तव्यं महेश्वर ! ॥१७॥
त्वया चरितमित्येतद्वक्तव्यं न क्वचित्प्रभो ! ।
अकर्त्तव्यमपि प्रश्नं क्षन्तुमर्हसि मे प्रभो ! ॥१८॥

वसिष्ठ उवाच

इति देव्या हरः पृष्ठो रहस्ये जनवर्जिते ।
उवाच परमं गुह्यं यद्यदाचरितं स्वकम् ॥१९॥

शिव उवाच

शृणु देवि ! प्रवक्ष्यामि यद्गुह्यं परमादभुतम् ।
न वक्तव्यं त्वया देवि ! जनेषु कथितं मया ॥२०॥
अपृथक्त्वाच्छरीरस्य वक्ष्यामि तव सुव्रते ! ।
नमुच्याद्या महादैत्याः पुरा स्वायम्भुवेऽन्तरे ॥२१॥

महाबला महावीर्या महावीरा महौजसः ।
सर्वे विष्णुरताः शुद्धाः सर्वपापविवर्जिताः ॥२२॥
त्रयीधर्मवृताः सर्वे भगवद्भक्तिसंयुताः ।
निर्जित्य सकलान्देवानव्यहतपराक्रमाः ॥२३॥
पदानि तेषां जगृहुर्बलवीर्यसमन्विताः ।
ततो देवगणास्सर्वे भग्ना इन्द्रपुरोगमाः ।
विष्णोः समीपमागम्य भयार्त्ताः शरणं गताः ॥२४॥

देवा ऊचुः

देवदेव ! महादैत्यैर्जम्भासुरपुरोगमैः ।
स्वात्स्वात्स्थानाच्च्याविताास्तु भवन्तं शरणं गताः ॥२५॥
अजेयान्सर्वदेवानां तपोनिर्धूत कल्मषान् ।
त्वमेवैतान्महादैत्याञ्जेतुमर्हसि केशव ! ॥२६॥

महादेव उवाच

इत्याकर्ण्य हरिर्वाक्यं देवानां च भयानकम् ।
तान्समाश्वास्य दिक्पालान्मामाह पुरुषोत्तमः ॥२७॥

श्रीभगवानुवाच

त्वं हि रुद्र महाबाहो ! मोहनार्थे सुरद्विषाम् ।
पाखण्डाचरणं धर्मं कुरुष्व सुरसत्तम ! ॥२८॥
तामसानि पुराणानि कथयस्व च तान्प्रति ।
मोहनानि च शास्त्राणि कुरुष्व च महामते ! ॥२९॥

मध्यभक्ताश्च विप्राश्च भविष्यन्ति महर्षयः ।
त्वच्छक्त्या तान्समाविश्य कथयस्व च तामसान् ॥३०॥

काणादं गौतमं शक्तिमुपमन्युंच जैमिनिम् ।
कपिलं चैव दुर्वासोमृकण्डू च वृहस्पतिम् ॥३१॥
भार्गवं जामदाग्न्यं च दशैतांस्तामसानृषीन् ।
तव शक्त्या समाविश्य कुरुष्व जगतोऽहितम् ॥३२॥
त्वच्छक्त्या च निविष्टास्ते तमसोद्रिक्तया भृशम् ।
तामसास्ते भविष्यन्ति क्षणादेव न संशयः ॥३३॥
कथयिष्यन्ति ते विप्रास्तामसानि जगत्रये ।
पुराणानि च शास्त्राणि त्वत्परत्वपराणि च ॥३४॥
कपालचर्मभस्मास्थिचिन्हान्यमरसर्वशः ।
त्वमेव धृत्वा ताँल्लोकान्मोहयस्व जगत्रये ॥३५॥
तथा पाशुपतं शास्त्रं त्वमेव कुरु सत्कृतः ।
कङ्कालशैवपाखण्डमहाशैवादिभेदतः ॥३६॥
अलक्ष्यं च मतं सम्यग्वेदबाह्यं नराधमाः ।
भस्मास्थिधारिणः सर्वे भविष्यन्ति ह्यचेतसः ॥३७॥
त्वां परत्वेन वक्ष्यन्ति सर्वशास्त्रेषु तामसाः ।
तेषां मतमधिष्ठाय सर्वे दैत्याः सदानवाः ॥३८॥
भवेयुस्ते मद्विमुखाः क्षणादेव न संशयः ।
अहमाप्यवतारेषु त्वां च रुद्र ! महाबल ! ॥३९॥

तामसानां मोहनार्थं पूजयामि युगे युगे । *
मतमेतदवष्टभ्य पतन्त्येव न संशयः ॥४०॥

* पूजा करने का दूसरा कारण यह भी है,—श्री भृगुजी के शाप से जब शिवजी योनिलिङ्ग स्वरूप हो गये तब शिव जी को इस दुख से छुड़ाने के लिये रामजी अपने कर कमलों से पूजा के बहाने अहिल्या एवं दण्डकारण्य और इन्द्रके समान शिवजीको स्पर्श किये। शिवजी को पूजा द्वारा, अहिल्या को और दण्डकारण्य को चरणद्वारा तथा गौतमशाप से सहस्रभगवाले इन्द्रको दर्शन द्वारा शुद्ध किये। यथा—

पद्मपुराण उत्तर खं. अ० २५५

भृगुशापान्महेशस्य योनिलिङ्गस्वरूपता ।
रामस्य हस्तकमलस्पर्शनाद्वै नृपोत्तम ! ॥११९॥
भविष्यत्यमलं तच्च रूपं लोकविगर्हितम् ।
राघवः सर्वदेवानां पावनः पुरुषोत्तमः ॥१२०॥
स्पृष्टा दृष्टाश्च तेनैव विमलाः शङ्करादयः ।
सर्वेषामपि देवानां पिता माता जनार्दनः ॥१२१॥
त्राता च सर्वलोकानां वात्सल्यगुणसागरः ।
तमेव शरणं गच्छ यदीच्छसि परं पदम् ॥१२२॥ इति ।

श्रीरामचरितमानस में शिवजी इसी कारणसे कहते हैं कि—
गिरिजा रघुपति कै यह रीती। संतत करहिं प्रणत पर प्रीती ॥

प्रीति करते हैं अर्थात् शाप से मुक्त करते हैं क्योंकि वे हमारे इष्ट देव हैं। 'सोइ मम इष्ट देव रघुवीरा' पापको हटा कर प्रेम करते हैं॥ इसी तरह सीताजी जनकपुर में और गिरिजा को समझें।

महादेव उवाच

तच्छ्रुत्वाऽहं यथोक्तं तु वासुदेवेन भामिनि ! ।
समुद्विग्नमना दीनो बभूवाऽत्र वरानने ? ॥
नमस्कृत्याऽथ तन्देवमब्रवं परमेश्वरम् ।
त्वयोदितमिदं देव ! करोमि यदि भूतले ॥४२॥
तस्मान्नाशो हि मे नाथ ! भविष्यति न संशयः ।
तन्न शक्यं मया कर्तुमेतत्कृत्यं हरेऽधुना ॥४३॥
त्वदाज्ञाऽपि च नोल्लङ्घ्या एतद् दुःखतरं महत् ।
एवमुक्ते ततो देवि समाश्वास्य च मां पुनः ॥
आत्मनाशाय तेनाऽत्र भवत्वित्याह मां हरिः ।
देवतानां हितार्थाय कुरुष्व वचनं मम ॥
तवाऽपि जीवनोपायं कथयामि सुरोत्तम ! ।
दत्तवान्कृपया मह्यमात्मनाम सहस्रकम् ॥
हृदये मां समाधाय जप मन्त्रं ममाऽव्ययम् ।
षडक्षरं महामन्त्रं तारकं ब्रह्मसञ्ज्ञितम् ॥
ये जपन्ति हि मां भक्त्या तेषां मुक्तिर्नसंशयः ।
इन्दीवरदलश्यामं पद्मपत्रविलोचनम् ॥
धनुर्बाणधरं ब्रह्म सर्वाभरणभूषितम् ।
पीतवस्त्रं द्विबाहुं च जानकीप्रियवल्लभम् ॥४९॥
रां रामाय नम इत्थमुच्चार्य मन्त्रमुत्तमम् ।
सर्वदुःखहरं चैतत्पापिनामपि मुक्तिदम् ॥
इमं मन्त्रं जपन्नित्यममलस्त्वं भविष्यसि ।

भस्मास्थिधारणाद् यत्तु सम्भूतं किल्विषं त्वयि ॥
मंगलं तद् भवेत् सर्वं मन्मन्त्रोच्चारणाच्छुभात् ।
तर्षितो नाशयिष्यामि पापं सर्वं सुरोत्तम !॥
मदन्यदेवताभक्तिर्जायते न तु सुव्रत ! ।
मनसैवार्चय हृदि मां नाथं पुरुषोत्तमम् ॥५३॥
मदाज्ञां कुरु मत्प्रीत्या सर्वमेतच्छुभं तव ।
इति सन्दिश्य मां देवि ! विससर्ज मरुद्गणान् ॥
विसृष्टास्ते ततो देवा निवृत्ताः स्वाश्रमं ययुः ।
ततो मां प्रार्थयामासुर्देवा इन्द्रपुरोगमाः ॥५५॥

इन्द्रादय ऊचुः

शीघ्रं कुरु हितं देव ! यथोक्तं हरिणाऽधुना ॥५६॥

महादेव उवाच

देवतानां हितार्थाय वृत्तिं पाखण्डिनां शुभे ! ।
कपालचर्मभस्मास्थिधारणं तत्कृतं मया ॥
तामसानि पुराणानि यथोक्तं विष्णुना शुभे ! ।
पाखण्डशैवशास्त्राणि यथोक्तं कृतवानहम् ॥
मच्छक्त्याऽपि समाविश्य गौतमादिद्विजानपि ।
वेदबाह्यानि शास्त्राणि सम्यगुक्तं मयाऽनघे ॥
इमं मतमवष्टभ्य दुष्टाः सर्वे च राक्षसाः ।
भगवद्विमुखाः सर्वे बभूवुस्तमसावृताः ॥६०॥
भस्मादिधारणं कृत्वा मोहाग्रतमसावृताः ।
मामेव पूजयाञ्चक्रुर्मांसासृक्चन्दनादिभिः ॥

मत्तो वरप्रदानानि लब्ध्वा मद्बलोद्धताः ।
अत्यन्तविषयासक्ताः कामक्रोधसमन्विताः ॥
सत्त्वहीनास्तु निर्वीर्या जिता देवगणैस्तदा ।
सर्वधर्मपरिभ्रष्टाः काले यान्त्यधमां गतिम् ।
ये मे मतमवष्टभ्य चरन्ति पृथिवीतले ॥
सर्वधर्मैश्च रहिताः पश्यन्ति निरयं सदा ॥६४॥

एवं देवहितार्थाय वृत्तिर्मे देवि! गर्हिता ।
विष्णोराज्ञां पुरस्कृत्य कृतं भस्मास्थिधारणम् ॥
बाह्यचिह्नमिदं देवि मोहनार्थाय विद्विषाम् ।
अथान्तर्हृदये नित्यं ध्यात्वा देवं जनार्दनम् ॥
जपन्नेव च तन्मन्त्रं तारकं ब्रह्मवाचकम् ।
सहस्रनामसदृशं विष्णोर्नारायणस्य तु ॥६७॥

षडक्षरं महामन्त्रं रघूणामीश्वरस्य हि ।
जपन्वै सततं देवि सदानन्दसुधाप्लुतम् ॥
सुखमात्यन्तिकं ब्राह्ममश्नामि सततं शुभे ! ॥इति।

वाल्मीकिरामायण सुन्दरकाण्ड सर्ग ५१।३९

रावणसे श्री हनुमान् जी

सर्वाँल्लोकान्सुसंहृत्य सभूतान्सचराचरान् ।
पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥

देवासुरनरेन्द्रेषु रक्षोयक्षो गेषु च ।
विद्याधरेषु नागेषु गन्धर्वेषु मृगेषुच ॥
सिद्धेषु किंनरेन्द्रेषु पतत्रिषु च सर्वतः ॥४०॥
सर्वत्र सर्वभूतेषु सर्वकालेषु नास्ति सः ।
यो रामं प्रतियुद्धयेत विष्णुतुल्यपराक्रमम् ॥४१॥
सर्वलोकेश्वरस्येह कृत्वा विप्रियमीदृशम् ।
रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ॥४२॥
देवाश्च दैत्याश्च निशाचरेन्द्र गन्धर्वविद्याधर नागयक्षाः ।
रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु सर्वे ॥४३॥
ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा ।
इन्द्रो महेन्द्रः सुरनायको वा स्थातुं न शक्ता युधि राघवस्य ॥४४॥

श्रीरामचरित्रमानस सुन्दरकाण्ड

शङ्कर सहस विष्णु अज तोही ।
राखि न सकहिं रामकर द्रोही ॥

श्री शिव जी वीरमणिके युद्धमें श्रीरामजी के प्रगट होने पर प्रणाम करते हुए स्तुति करते हैं —

पद्मपुराण पातालखण्डे अ०४६।५

स्थाणुस्तदागतं रामं योगिनां ध्यानगोचरम् ।
पतित्वा पादयोर्विप्र जगाद प्रणताभयम् ॥
एकस्त्वं पुरुषः साक्षात् प्रकृतेः पर ईर्यसे ।
यः स्वांशकलया विश्वं सृजस्यवसि हंसि च ॥
अरूपस्त्वमशेषस्य जगतः कारणं परम् ।

एक एव त्रिधा रूपं गृह्णासि कुहकान्वितः ।
सृष्टौ विधातृरूपेण पालने स्वयमास च ।
प्रलये जगतः साक्षादहं शर्वाख्यतां गतः ॥
तव यत्परमेशस्य हयमेधक्रतुक्रिया ।
ब्रह्महत्यापनोदाय तद्विडम्बनमद्भुतम् ॥
यत्पादशौचममलं गङ्गाख्यं शिरसोऽन्तरा ।
वहामि पापशान्त्यर्थं तस्य ते पातकं कुतः ॥
मया ह्यपकाराय कृतं कर्म तव स्फुटम् ।
क्षम्यतां तत्कृपालो हि भवतो व्यवधायकम् ॥

श्री शिवजी सर्वेश्वर श्री रामजी की स्तुति करते हैं ।

स्कन्दपुराणनिर्वाणखण्डस्य द्वात्रिंशत्तमोध्याये श्रीमद्रामगीता अ० १ ॥

सत्यानन्दस्त्वमेवासि यत्र भेदो न विद्यते ।
तव लीला प्रपञ्चोऽयं तत्त्वं चाहमितित्रिधा ॥७२॥
सन्मात्रस्याद्वितीयस्य विभोरेकस्य ते प्रभो ।
शक्तितत्त्वादिभेदोयं वस्तुतो नैव विद्यते ॥७३॥
स्वस्वातंत्र्यात्सिसृक्षोर्वा शक्त्यादिरुपचर्यते ।
भजतां मुक्तये स्यातां नामरूपे महेश्वर ॥७४॥
निराकारोऽपि साकारो भक्तानामनुकंपया ।
स्वानन्द एव रमसे स्वच्छन्दगतिरीश्वरः ॥७५॥
भिन्नामिव विधायैनां चिच्छक्तिं जनकात्मजाम् ।
गोपायस्यात्मनात्मानं तारकं ब्रह्मशब्दितम् ॥७६॥

यतो वाचो निवर्त्तन्ते मनसा सह दूरतः ।
तत् त्वमेव परं ज्योतिस्तमसः परमक्षयम् ॥७७॥
तवांशोहं हरिर्ब्रह्मा सर्वे देवाश्चराचरम् ।
जगत्पूज्यो ह्यहं तस्मादुमया सह चानया ॥७८॥
आवां राम जगत्पूज्यावावयोश्च युवां सदा ।
त्वन्नाम जापिनी गौरी त्वन्मंत्रजपवानहम् ॥७९॥
मुमूर्षोर्मणिकर्ण्यं तदर्द्धोदकनिवासिनः ।
अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम् ॥८०॥

श्रीमद्वाल्मीयरामायण लंकाकाण्ड सर्ग ११७

गायत्रीपति श्रीब्रह्मा जी सर्वेश्वर श्री रामजी की स्तुति करते हैं—

भवान्नारायणो देवः श्रीमांश्चक्रायुधः प्रभुः ।
एकशृंगो वराहस्त्वं भूतभव्यसपत्नजित् ॥१४॥
अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव ।
लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः ॥१५॥
शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः ।
अजितः खड्गधृग्विष्णुः कृष्णश्चैव बृहद्बलः ॥१६॥
सेनानीर्ग्रामणीः सर्वं त्वं बुद्धिस्त्वं क्षमा दमः ।
प्रभवश्चाप्ययश्च त्वमुपेंद्रो मधुसूदनः ॥१७॥
इन्द्रकर्मा महेन्द्रास्त्वं पद्मनाभो रणांतकृत् ।
शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः ॥१८॥
सहस्रशृङ्गो वेदात्मा शतशीर्षो महर्षभः ॥१९॥

त्वं त्रयाणां हि लोकानामादिकर्त्ता स्वयं प्रभुः ।
सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः ॥२०॥
त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परात्परः ।
प्रभवं निधनं चापि नो विदुः को भवानिति ॥२१॥

वाल्मीकिरामायण उत्तरकांड सर्ग १०४

संक्षिप्य हि पुरा लोकान् मायया स्वयमेव हि ।
महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ॥४॥
ततस्त्वमसि दुर्धर्षात् तस्माद् भावात् सनातनात् ।
रक्षां विधास्यन् भूतानां विष्णुत्वमुपजिग्मवान् ॥९॥

अब श्रीलक्ष्मीपति श्रीविष्णु भगवान् को देखिये । पहले कह आया हूँ कि त्रिदेव रामजी को भजते हैं ।

पुलस्त्यसंहिता

सावित्री ब्रह्मणा सार्द्धं लक्ष्मी नारायणेन च ।
शंभुना रामरामेति पार्वती जपति स्फुटम् ॥

अपने अंशी को भजना कर्तव्य है । अथर्वणे—

यस्यांशेनैव ब्रह्मविष्णुमहेश्वरा अपि जाता महाविष्णुर्यस्य दिव्यगुणश्च । स एव कार्यकारणयोः परः परमपुरुषो रामो दाशरथिर्बभूव ।

तथा सामवेदे तैत्तिरीयशाखायाम्

श्रीरामः सवितरि सर्वेषामीश्वरो यमेवैष वृणुते स पुमानस्तु यमवैदस्माद् भूर्भुवः स्वः त्रिगुणमयो बभूव इतीमं नरहरिः स्तौतीमं गंधमादनः स्तौतीमं यज्ञतनुः स्तौतीमं महाविष्णुः स्तौतीमं विष्णुः

स्तैतोमं महाशंभुः स्तोतीमं द्वैतं मण्डलं तपति यत्पुरुषं दक्षिणाक्षं मण्डलो वै मण्डलार्च्यः मण्डलस्थमिति ॥

पञ्चरात्र

यतो विनिर्गताश्चांशा विस्फुलिंगा इवारणेः ।
तथा सर्वावताराणामवतारी रघुत्तमः ॥

भरद्वाजसंहिता

नारायणोऽपि रामांशः शंखचक्रगदाब्जधृक् ।
चतुर्भुजस्वरूपेण वैकुण्ठे च प्रकाशते ॥
अवताराः बहवः सन्ति कलाश्चांशविभूतयः ।
राम एव परं ब्रह्म सच्चिदानन्दमव्ययम् ॥

शिवसंहिता पटल ५। अ० २

अवतारास्तु बहवः कला अंशा विभूतयः ।
रामो धनुर्धरः साक्षात्सर्वेशो भगवान् स्वयम् ॥

भुशुण्डिरामायणे

तुरीया जानकी प्रोक्ता तुरीयो रघुनन्दनः ।
उभयोरंशजः सर्वे ह्यवतारा असंख्यकाः ॥

सनत्कुमारसंहिता रामस्तवराज ६७

मुनीन्द्रगुह्यं परिपूर्णकामं कलानिधिं कल्मषनाशहेतुम् ।
परात्परं यत्परमं पवित्रं नमामि रामं महतो महान्तम् ॥६७॥
निरञ्जनं निष्प्रतिमं निरीहं निराश्रयं निष्कलमप्रपंचम् ।
नित्यं ध्रुवं निर्विषयस्वरूपं निरंतरं राममहं भजामि ॥५५॥

महारामायणसर्ग १ तथा सुदर्शनसंहिता

राघवस्य गुणो दिव्यो महाविष्णुः स्वरूपवान् ।
वासुदेवो घनीभूतस्तनुतेजः सदाशिवः ॥
मत्स्यश्च रामहृदयं योगरूपी जनार्दनः ।
कूर्मश्चाधारशक्तिश्च वाराहो भुजयोर्बलम् ॥
नारसिंहो महाकोपो वामनः कटिमेखला ।
भार्गवो जङ्घयोर्जातो बलरामश्च पृष्ठतः ॥
बुद्धस्तु करुणा साक्षात् कल्किश्चित्तस्य हर्षतः ।
कृष्णः शृङ्गाररूपश्च वृन्दावनविभूषणः ॥
एते चांशकलाः सर्वे रामो ब्रह्म सनातनः ।

श्रीरामचरितमानस बालकाण्ड दो० १९८

व्यापक ब्रह्म निरंजन निर्गुन विगत विनोद ।
सो अज प्रेम भगति बश कौशल्या के गोद ॥

विनयपत्रिका पद नं० १३५

हरिहि हरिता विधिहि विधिता शिवहि शिवता जो दई ।
सोइ जानकीपति मधुर मूरति मोदमय मंगल मई ॥३॥

श्रीरामचरितमानस बालकाण्ड

उपजहिं जासु अंश ते नाना । शिव विरञ्चि विष्णु भगवाना ॥
सब कर परम प्रकाशक जोई । राम अनादि अवधपति सोई ॥

अथ ब्रह्मसंहिता पाद २ अ० ७।१९ श्रीनारायणप्रोक्तं

श्रीरामष्टाक्षरमन्त्रस्तोत्रम्

चिद्रूपस्यात्मनो रूपं पारतन्त्र्यं विचिन्त्य च ।

चिन्तयेच्चेतसा नित्यं श्रीरामः शरणं मम ॥१॥
अचिन्त्योऽपि शरीरादेः स्वातन्त्र्यं नैव विद्यते ।
चिन्तयेच्चेतसा नित्यं श्रीरामः शरणं मम ॥२॥
आत्माधारं स्वतन्त्रं च सर्वशक्तिं विचिन्त्य च ।
चिन्तयेच्चेतसा नित्यं श्रीरामः शरणं मम ॥३॥
नित्यात्मगुणसंयुक्तो नित्यात्मतनुमण्डितः ।
नित्यात्मकेलिनिलयः श्रीरामः शरणं मम ॥४॥
गुणलीला स्वरूपेषु मितिर्यस्य न विद्यते ।
अतो वाङ्मनसावेद्यः श्रीरामः शरणं मम ॥५॥
कर्त्ता सर्वस्य जगतो भर्त्ता सर्वस्य सर्वगः ।
संहर्त्ता कार्यजातस्य श्रीरामः शरणं मम ॥६॥
वासुदेवादिमूर्त्तीनां चतुर्णां कारणं परम् ।
चतुर्विंशतिमूर्त्तीनामाश्रयः शरणं मम ॥७॥
नित्यमुक्तजनैः पुष्टो निविष्टः परमे पदे ।
परं परमभक्तानां श्रीरामः शरणं मम ॥८॥
महदादिस्वरूपेण संस्थितः प्राकृते पदे ।
ब्रह्मादिदेवरूपैश्च श्रीरामः शरणं मम ॥९॥
मन्वादिनृपरूपेण श्रुतिमार्गं विभर्त्ति यः ।
प्रजापतिस्वरूपेण श्रीरामः शरणं मम ॥१०॥
ऋषिरूपेण यो देवो वनवृत्तिमपालयत् ।
योऽन्तरात्मा च सर्वेषां श्रीरामः शरणं मम ॥११॥
योऽसौ सर्वतनुः सर्वः सर्वनामा सनातनः ।

अलिप्तः सर्वभावेषु श्रीरामः शरणं मम ॥१२॥
बहिर्मर्त्यादिरूपेण सद्धर्ममनुपालयन् ।
परिपाति जनान् दीनाञ् श्रीराम. शरणं मम ॥१३॥
यश्चात्मानं पृथक्कृत्य भक्तप्रेमवशं गतः ।
अर्चायामास्थितो देवः श्रीरामः शरणं मम ॥१४॥
सर्वावताररूपाणां दर्शनस्पर्शनादिभिः ।
दीनानुद्धरते योऽसौ श्रीरामः शरणं मम ।१५॥
कौशल्याशुक्तिसञ्जातो जानकीकण्ठभूषणः ।
मुक्ताफलसमो योऽसौ श्रीरामः शरणं मम ॥१६॥
विश्वामित्रमखत्राता ताटकागतिदायकः ।
अहल्याशापशमनः श्रीरामः शरणं मम ॥१७॥
पिनाकभञ्जकः श्रीमाञ् जानकीप्रेमपालकः ।
जामदग्न्यप्रतापघ्नः श्रीरामः शरणं मम ॥१८॥
राज्याभिषेकसंहृष्टः कैकेयीवचनात् पुनः ।
पित्रा दत्तवनक्रीडः श्रीरामः शरणं मम ॥१९॥
जटाचीरधरो धन्वी जानकीलक्ष्मणान्वितः ।
चित्रकूटकृतावासः श्रीरामः शरणं मम ॥२०॥
महापञ्चवटीलीलासञ्जातपरमोत्सवः ।
दण्डकारण्यसञ्चारी श्रीरामः शरणं मम ॥२१॥
खरदूषणसम्भेदी दुष्टराक्षसभञ्जनः ।
हृतशूर्पणखाशोभः श्रीरामः शरणं मम ॥२२॥
मायामृगविभेत्ता च हृतसीतानुतापकृत् ।

जानकीविरहाक्रोशी श्रीरामः शरणं मम ॥२३॥
लक्ष्मणानुचरो धन्वी लोकयात्राविडम्बकः ।
पम्पातीरकृतान्वेषः श्रीरामः शरणं मम ॥२४॥
जटायुत्राणकर्त्ता च कबन्धगतिदायकः ।
हनुमत्कृतसाहित्यः श्रीरामः शरणं मम ॥२५॥
सुग्रीवराज्यदः श्रीशो वालिनिग्रहकारकः ।
अङ्गदाश्वासनकरः श्रीरामः शरणं मम ॥२६॥
सीतान्वेषणनिर्मुक्तहनुमत्प्रमुखव्रजः ।
मुद्रानिवेशितबलः श्रीरामः शरणं मम ॥२७॥
हेलोत्तारितपाथोधिर्दूतनिर्धूतराक्षसः ।
लङ्कादाहकरो धीरः श्रीरामः शरणं मम ॥२८॥
सेतुसम्बद्धपाथोधिर्लङ्काप्रासादरोधकः ।
रावणादिप्रभेत्ता च श्रीरामः शरणं मम ॥२९॥
जानकीजीवनत्राता विभीषणसमृद्धिदः ।
पुष्पकारोहणासक्तः श्रीरामः शरणं मम ॥३०॥
राजसिंहासनारूढः कौसल्यानन्दवर्धनः ।
नामनिर्धूतनिरयः श्रीरामः शरणं मम ॥३१॥
यज्ञकर्त्ता यज्ञभोक्ता यज्ञभर्त्ता महेश्वरः ।
अयोध्यामुक्तिदः शास्ता श्रीरामः शरणं मम ॥३२॥
प्रपन्नः सर्वधर्मेभ्यो मामेकं शरणं गतः ।
पठन्निदं मम स्तोत्रं मुच्यते भवबन्धनात् ॥३३॥
मन्त्रश्चाष्टाक्षरो देवो श्रीरामः शरणं मम ।

सिद्धोपायोऽक्षरविदां भावनापरिकल्पितः ॥३४॥

इति बृहद् ब्रह्मसंहितायां श्रीनारायणप्रोक्तं
श्रीरामाष्टाक्षरमन्त्रस्तोत्रं समाप्तम् ।

अथ श्रीवशिष्ठसंहितार्गतं श्रीहनुमत्प्रोक्तं

श्रीसीताऽष्टाक्षरस्तोत्रम्

श्रीअङ्गद उवाच

लङ्कायां हि प्रचण्डाग्नेर्यत्पाठाद् रक्षितोऽसि तत् ।
श्रीसीताष्टाक्षरस्तोत्रं वक्तुमर्हसि मारुते ॥१॥

श्रीहनुमानुवाच

रामभक्त महाभाग सन्मते बालिनन्दन ।
श्रीसीताष्टाक्षरस्तोत्रं सर्वभीतिहरं शृणु ॥२॥

श्रीमद्रामप्रिया पुण्या श्रीमद्रामपरायणा ।
श्रीमद्रामादभिन्ना च श्रीसीता शरणं मम ॥३॥

शरण्या श्रितरक्षित्री भास्करादेर्विभासिका ।
आकारत्रयशिक्षित्री श्रीसीता शरणं मम ॥४॥

शक्तिदा शक्तिहीनानां भक्तिदा भक्तिकामिनाम् ।
मुक्तिदा मुक्तिकामानां श्रीसीता शरणं मम ॥५॥

ब्रह्माण्युमारमाराध्या ब्रह्मेशादिसुरस्तुता ।
वेदवेद्या गुणाम्भोधिः श्रीसीता शरणं मम ॥६॥

शून्या हि निग्रहेणाथानुग्रहाब्धिः सुवत्सला ।
जननी सर्वलोकानां श्रीसीता शरणं मम ॥७॥

चिदचिद्भ्यां विशिष्टा च सच्चिदानन्दरूपिणी ।
कार्यकारणरूपा च श्रीसीता शरणं मम ॥८॥
विशोका दिव्यलोका च बिम्बी दिव्यभूषणा ।
दिव्याम्बरा च दिव्याङ्गी श्रीसीता शरणं मम ॥९॥
भर्त्री च जगतः कर्त्री हर्त्री जनकनन्दिनी ।
जगद्धर्त्री जगद्योनिः श्रीसीता शरणं मम ॥१०॥
सर्वकर्मसमाराध्या सर्वकर्मफलप्रदा ।
सर्वेश्वरी च सर्वज्ञा श्रीसीता शरणं मम ॥११॥
नित्यमुक्तस्तुता स्तुत्या सेविता विमलादिभिः ।
अमोघपूजनस्तोत्रा श्रीसीता शरणं मम ॥१२॥
कल्पवल्ली हि दीनानां सर्वदाग्द्रिचनाशिनी ।
भूमिजा शान्तिदा शान्ता श्रीसीता शरणं मम ॥१३॥
आपदां हारिणी चाथ कारिणी सर्वसम्पदाम् ।
भवाब्धितारिणी सेव्या श्रीसीता शरणं मम ॥१४॥

श्रीवशिष्ठ उवाच

पाठाद्धनुमता प्रोक्तं नित्यमुक्तेन श्रद्धया ।
श्रीसीताष्टाक्षरस्तोत्रं भुक्तिमुक्तिप्रदं नृणाम् ॥१५॥

—०—

स्कन्दपुराण निर्वाणखण्ड अ० ३२ । श्रीरामजी की स्तुति

श्रीविष्णुरुवाच

नमो रामाय विभवे तुभ्यं विश्वैकसाक्षिणे ।
नमो विश्वैकदेहाय नमो विश्वातिगाय ते ॥७॥

नमो नित्याय शुद्धाय प्रभवे कालमूर्त्तये ।
दशदिग्बाहवे तुभ्यं नमो भूचरणाय च ॥८॥
नमोम्भोरेतसे शश्वत्तेजोनेत्राय ते नमः ।
वायुचेष्टाय महते व्योमदेहाय ते नमः ॥९॥
अहं ते हृदयं राम तव नाभिः पितामहः ।
कण्ठस्ते नीलकण्ठोऽसौ भ्रूमध्यं च दिवेश्वरः ॥१०॥
सदाशिवो ललाटस्ते तत ऊर्ध्वं परः शिवः ।
भूषणानि च तत्वानि विश्वाकारस्य ते प्रभो ॥११॥
भूरादिसप्तलोकाश्च नृत्यतो रंगभूमयः ।
सप्तपातालगर्त्तश्च पार्ष्णिवाताः स्थिता हि ते ॥१२॥
अनन्ताः शक्तयो राम प्रदृश्यन्ते तव प्रभो ।
बहूंश्चादृष्टपूर्वांश्च पश्याम्यद्य पितामहान् ॥१३॥
विष्णूनसंख्यान् पश्यामि त्वयि रुद्राननेकशः ।
बहुरूपान्बहुभुजान् बहुवर्णान्महोदयान् ॥१४॥
वर्त्तमानानतीतांश्च सुरानिह भविष्यतः ।
नाऽहमन्तं प्रपश्यामि विभूतीनां तव प्रभो ॥१५॥ इत्यादि

ब्रह्मवैवर्तपु. श्रीकृष्णजन्म खं. अ० ६२।५२ श्रीरामजी के पाने के लिये तप करती हुई शूर्पणखासे ब्रह्माजी कहते हैं—

अप्राप्य रामं दुष्प्रापं करोषि दुष्करं तपः ।
ब्रह्मविष्णुशिवादीनामीश्वरं प्रकृतेः परम् ॥
जन्मान्तरे च भर्त्तारं प्राप्स्यसि त्वं वरानने ।
देहं तत्याज सा वह्नौ सा च कुब्जा बभूव ह ॥

अतः जो ब्रह्मा विष्णु शिवादिके इष्टदेव हैं उनको यह राक्षसी पतिरूपमें प्राप्त करना चाहती थी यह अनधिकार चेष्टा है। भला जो श्रीलक्ष्मीजी वैकुण्ठ में नारायण भगवान् से श्रीराममन्त्र प्राप्त करके भी श्रीरामजी को पति के रूप में नहीं पा सकीं। उनको वेदवती के रूप में तप करना पड़ा। तब केवल वनकी लीला (लंका) में रहकर जानकी जी की छाया रूप हो जानकीजी के प्रिय कार्य करने पर भी रामजी नहीं स्वीकार किये।

पद्मपु. पातालखं. अ० १०५

निर्गन्तुं कांक्षते तत्र अनम्यतन्मुखाम्बुजम्।
स्मरबाणेन पद्मेन सम्पीडच रघुशेखरम् ॥४९॥
अन्वेव निर्ययौ देवी पद्मा पद्मवनप्रिया।
एक पत्नीव्रतं ज्ञात्वा रामं ते समुपागमन् ॥५०॥
अवेपितसर्वाङ्गं स्खलत्पदगतिं नृपम्।
शिवनारायणौ दृष्ट्वा विस्मयं परमं गतौ ॥५१॥
अहोऽस्य द्रढ़िमा चित्ते मायिनोऽप्यवशात्मनः।
धैर्यं पश्येह नियतं तेन रामः सुकीर्तिमान् ॥५२॥

स्कन्द पु. वैष्णवखण्ड वेंकटाचलमाहात्म्य अ० ५।२३

जैसे श्री राधाजी की छाया रायाण की स्त्री थी वैसी ही श्रीसीताजी की छाया वेदवती है॥ श्री विष्णु भगवान् अपने इष्ट देव श्री रामजी का मन्त्र श्रीलक्ष्मी जी को दे रहे हैं। यथा--

सदाशिवसंहिता अ० ९

रमां प्रबोधितः श्रीमान् विष्णुः सर्वजनेश्वरः।

ग्राहयामास तां देवीं तारकं ब्रह्मवाचकम् ॥
कृतकृत्या तदा लक्ष्मीर्लब्ध्वा मन्त्रं षडक्षरम् ॥

ऐसे परब्रह्म श्रीरामजी को जो कोई रावणके सदृश दशरथ-पुत्र राजकुमार मान कर श्रीरामजी की अवहेलना करते हैं, वे श्रीवाल्मीकिरामायणादि के रहस्य को जानते ही नहीं हैं। यथा—

रामचरितमानस बालकाण्ड दो० ११५

मुकुरमलिन अरु नयन विहीना। राम रूप देखहिं किमि दीना ॥
जिनके अगुन न सगुन विवेका। जल्पहिं कल्पित वचन अनेका ॥
कहहिं सुनहिं अस अधमनर, ग्रसे जो मोह पिशाच।
पाखण्डी हरिपद विमुख, जानहिं झूठ न साँच ॥ दो० ११४

वाल्मीकिरामायण उत्तरकाण्ड सर्ग १०९

वेदा ब्राह्मणरूपेण गायत्री सर्वरक्षिणी।
ओंकारोऽथ वषट्कारः सर्वे राममनुव्रताः ॥

पद्मपुराण उत्तर खं. अ० २४४।७४ से

रामस्य दक्षिणे पार्श्वे पद्महस्ता रमा गता।
तथैव धरणी देवी दक्षिणेतरगा तथा ॥
वेदाः साङ्गाः पुराणानि सेतिहासा हि सर्वतः।
ॐकारोथ वषट्कारः सावित्री लोकपावनी ॥
अस्त्रशस्त्राणि च तदा धनुराद्यानि पार्वति।
अनुजग्मुस्तथा रामं सर्वे पुरुषविग्रहाः ॥

अद्वैत मतवाले भी अपने अध्यात्म रामायण द्वारा इसे स्वीकार किये हैं।

उत्तरकाण्ड सर्ग ९।५१

वेदाश्च सर्वे धृतविग्रहाश्च ययुश्च सर्वे मुनयश्च दिव्याः ।
माता श्रुतीनां प्रणवेन साध्वी ययौ हरिं व्याहृतिभिः समेता ॥
रामस्तु पद्भ्यां सरयूजलं सकृत् स्पृष्ट्वा पारक्रामदनन्तशक्तिः ।
ब्रह्मा तदा प्राह कृताञ्जलिस्तं रामं परात्मन् परमेश्वर त्वम् ॥

श्रुतिस्मृति पुराणादि प्रतिपाद्य ओम् भी जिन श्रीदशरथ-पुत्र श्रीरामजी की उपासना करते हैं। और तो क्या श्रीविष्णु के अवतार श्रीपरशुराम के तेजको भी जो छीन लेने वाले हैं। दूसरी बात यह भी है कि श्रीविष्णुके अवतार श्रीव्यासजी भी ॐ को अपने इष्ट देव उन श्रीराम जीका अनुगमन कराते हैं।

स्कन्दपुराण वैष्णवखण्ड अयोध्यामा. अ० ६

वेदो ब्राह्मणरूपेण सावित्री सव्यदक्षिणे ।
ओंकारोऽथ वषट्कारः सर्वे रामं तदाऽव्रजन् ॥
रामस्य सव्यपार्श्वे तु सपद्मा श्रीः समाश्रिता ।
दक्षिणे ह्रीर्विशालाक्षी व्यवसायस्तथाऽग्रतः ॥
नानाविधायुधान्यत्र धनुर्ज्याप्रभृतीनि च ।
अनुव्रजन्ति काकुत्स्थं सर्वे पुरुषविग्रहाः ॥
ऋषयश्च महात्मानः सर्वे चैव महीधराः ।
अनुगच्छन्ति काकुत्स्थं स्वर्गद्वारमुपस्थितम् ॥

शिवसंहिता शेषजी

विष्णुकोटिप्रतिपालं ब्रह्मकोटिविसर्जनम् ।
रुद्रकोटिप्रमर्दं वै मातृकोटिविनाशनम् ॥

भानुकोटिप्रतीकाशं चन्द्रकोटिप्रमोदकम् ।
इन्द्रकोटिसदामोदं वसुकोटिवसुप्रदम् ॥
भैरवकोटिसंहारं मृत्युकोटिविभक्षणम् ।
यमकोटिदुराधर्षं कालकोटिप्रधावकम् ॥
गन्धर्वकोटिसंगीतं गणकोटिगणेश्वरम् ।
कामकोटिकलानाथं दुर्गाकोटिविमोहनम् ॥
सर्वसौभाग्यनिलयं सर्वानन्दैकदायकम् ।
कौसल्यानन्दनं रामं केवलं भवखण्डनम् ॥

स्कन्दपु० चातुर्मासमा० २४।४६

रमते सर्वभूतेषु स्थावरेषु चरेषु च ।
अन्तरात्मस्वरूपेण यच्च रामेति कथ्यते ॥

पद्मपु० उत्तरखण्ड अ० २५४।२१

रमन्तेयोगिनोऽनन्ते सत्यानन्दे चिदात्मनि ।
तेन रामपदेनाऽसौ परं ब्रह्माऽभिधीयते ।।२१।।

महारामायण ५१।५३—श्री रामनाम के तीन पदों में सत् चित् आनन्द ।

चिद्वाचको रकारः स्यात्सद्वाच्योऽकार उच्यते ।
मकारानन्दवाची स्यात्सच्चिदानन्दमव्ययम् ।।५३।।

रामपूर्वतापन्युपनिषद्

रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति राम पदेनासौ परं ब्रह्माभिधीयते ॥

वेदस्तुति ऋग्० १०।९३।१४

प्र तद्दुःशी मे पृथवाने वेने प्रराम वोचमसुरे मघवत्सु ।
ये युक्वाय पञ्चशतास्मयु पथा विश्राव्येषाम् ॥

ऋग्० १०।१११।७

सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन् ।
आयन्नक्षत्रं ददृशे दिवो न पुनर्यतो न किरद्धा नु वेद ॥

ऋग्० १०।३।३

भद्रो भद्रया सचमान आगात् स्वसारं जारो अभ्येति पश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन् रुशद्भिर्वर्णैरभिराममस्थात् ॥

श्रीसीताजी ऋग्० ४।५७।६॥ अथर्व० ३।१।॥ तै० अ० ६।६२

अर्वाची सुभगे भव सीते वन्दामहे त्वा ।
यथा नः सुभगासससि यथा नः सुफलासससि ॥

मन्त्रार्थ–(हे सुभगे) हे दिव्य ऐश्वर्यशालिनि "लक्ष्मीतन्त्र" में आपको ज्ञान शक्ति बल ऐश्वर्य वीर्य तेज आदि प्रभाव वाली, अनन्तानन्त रूपवाली अभेद्या और सबका भेदन करनेवाली कहा है तथा सीतोपनिषद्प्रतिपाद्य(सीते)सीताजी आप आश्रितों के पापों का नाश करनेवाली (त्वा) देवाधिदेव श्रीरामजी की दिव्य प्राणप्रिये (वन्दामहे) हम लोग आप की शरण में आते हैं (यथा) जिस प्रकार से (नः) जिसका कोई अन्य शरण नहीं है ऐसे हमसब को आप (सुभगा) ऐश्वर्यादि प्रदान करनेवाली एवं (सुफला) भगवान् श्री-राम की प्राप्ति में उपस्थित प्रतिबन्धों को दूर करनेवाली (अससि)

प्रकाशित हो, ऐसी आप हैं। हम सब आपके वात्सल्य गुणों का अनुसंधान करनेवालों के ऊपर (अर्वाची भव) अनुकूल होवें।

अवतारकाल में भी दिव्य देह (यजु० ४०)

सपर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः॥

अथ बृहद्वैष्णवपुराणे—

न तस्य प्राकृता मूर्त्तिर्मांसमेदोऽस्थिसंभवा।
न भूतसंघसंस्थानो देहोऽस्यपरमात्मनः॥
सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः।
हानोपादानरहिता नैव प्रकृतिजाः क्वचित्॥
परमानन्दसन्दोहा ज्ञानमात्राश्च सर्वतः।
सर्वे सर्वगुणैः पूर्णाः सर्वदोषविवर्जिताः॥
यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः।
स सर्वस्माद्वहिष्कार्यः श्रौतस्मार्त्तविधानतः॥

श्रीमद्भागवत् १।३।३०-३१

एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः।
मायागुणैर्विरचितं महदादिभिरात्मनि॥
यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले।
एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः॥

भगवद्गीता अ० ७

यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः॥३॥
अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।

परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥२४॥
नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥२५॥
जन्मकर्मचमेदिव्यमेवं यो वेत्ति तत्त्वतः ४।९।
अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥४।६॥

श्रीरामपूर्वतापिनी

चिन्मस्याद्वितीयस्य निष्कलस्याशरीरिणः ।
उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना ॥
द्विचत्वारिषडष्टानां दशद्वादशषोडश ।
अष्टादशामी कथिता हस्ताः शंखादिभिर्युताः ॥
सहस्रान्तास्तथा तासां वर्णबाहनकल्पना ।
शक्तिसेनाकल्पना च ब्रह्मण्येवं हि पञ्चधा ॥
कल्पितस्य शरीरस्य तस्य सेनादिकल्पना ॥

मुण्डकोपनिषद् २।८

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥

श्रीरामचरितमानस

राम ब्रह्म चिन्मय अविनासी सर्वरहित सब उरपुरवासी ॥
चिदानन्दमय देह तुम्हारी । विगत विकार जान अधिकारी ॥
नर तन धरेहु संत सुर काजा । कहहु करहु जस प्राकृत राजा ॥
राम देखि सुनि चरित तुम्हारे । जड़ मोहहिं बुध होहिं सुखारे ॥

राम सच्चिदानन्द दिनेशा । नहिं तहँ मोह निशा लवलेशा ॥
निज भ्रम नहिं समुझहिं अज्ञानी । प्रभु पर मोह धरहिं जड़ प्रानी ॥

वा० रा० अ० सर्ग १७।१४

यश्च रामं न पश्येत्तु यं च रामो न पश्यति ।
निन्दितः सर्वलोकेषु स्वात्माप्येनं विगर्हते ॥

श्रीमद्भागवत् १०।२३।३९-३८

दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिमलौकिकीम् ।
आत्मानं च तथा हीनमनुतप्ता व्यगर्हयन् ॥
धिग् जन्म नस्त्रिवृद्विद्यां धिग् व्रतं धिग् बहुज्ञताम् ।
धिग् कुलं धिक् क्रियादाक्ष्यं विमुखा ये त्वधोक्षये ॥
नूनं भगवतो माया योगिनामपि मोहिनी ॥

ब्रह्माजी का विवाह गायत्रीसे

स्कन्दपुराण नागर खं. अ० १७१।५९

इन्द्र के पूछने पर

गोपकन्यास्मि भद्रन्ते तक्रं विक्रेतुमागता ।
परिगृह्णासि मे मूल्यं तच्छीघ्रं देहि मा चिरम् ॥
तच्छ्रुत्वा त्रिदिवेन्द्रोपि मत्वा तां गोपकन्यकाम् ।
जगृहे त्वरया युक्तस्तक्रं चोत्सृज्य भूतले ॥
अथ तां रुदतीं शक्रः समादाय त्वरान्वितः ।

रुद्र उवाच

गायत्रीनाम त्वत्पत्नी तस्मादेव भविष्यति ।

ब्रह्मोवाच

वदन्तु ब्राह्मणास्सर्वे गोपकन्याप्यसौ यदि ।
सा भूय ब्राह्मणी श्रेष्ठा यथा पत्नी भवेन्मम ॥

ब्राह्मणा ऊचुः

एषा स्याद् ब्राह्मणी श्रेष्ठा गोपजातिविवर्जिता ।
अस्मद्वाक्याच्चतुर्वक्त्र कुरु पाणिग्रहं द्रुतम् ॥

सूत उवाच

ततः पाणिग्रहं चक्रे तस्या देवः पितामहः ॥७१॥

—०—

प्रभासखण्ड अ० १५९।२४

दृष्टा गोपालकन्यैका रूपयौवनशालिनी ।
बिभ्रती तक्रपूर्णं सा कुम्भं कन्येत्यवोचत ॥
तां गृहीत्वा ततश्शक्रः प्रविष्टो यत्र दीक्षितः ।
देवदेवश्चतुर्वक्त्रो विष्णुरुद्रसमन्वितः ॥
सम्प्रदानन्तु कृतवान् कन्याया मधुसूदनः ।
प्ररितश्शङ्करेणैव ब्रह्मदेवर्षिभिस्तथा ॥
परिणीता ततो दीक्षां तस्याश्चक्रे यथात्मनः ।
ततः प्रवर्त्तितो यज्ञस्सर्वकामसमन्वितः ॥

ब्रह्मोवाच

पत्नी ममेयं गायत्री वेदमाता भविष्यति ॥

—०—

पद्मपु. सृष्टिखं. अ० १६ इन्द्रके पूछने पर आभीरकन्या

गोपकन्या त्वहं वीर विक्रीणामीह गोरसम् ।
नवनीतमिदं शुद्धं दधि चेदं विमण्डकम् ॥१५५॥
दध्ना चैवात्र तक्रेण रसेनापि परंतप ।
अर्थी येनासि तद्ब्रूहि प्रगृह्णीष्व यथेप्सितम् ॥१५६॥
एवमुक्तस्तदा शक्रो गृहीत्वा तां करे दृढम् ।
अनयत्तां विशालाक्षीं यत्र ब्रह्मा व्यवस्थितः ॥१५७॥
नीयमाना तु सा तेन क्रोशन्ती पितृमातरौ ।
हा तात मातर्हा भ्रातर्नयत्येष नरो बलात् ॥१५८॥
यदि तेऽस्ति मया कार्यं पितरं मे प्रयाचय ।
स दास्यति हि मां नूनं भवतः सत्यमुच्यते ॥ इत्यादि

पुनः अ० १७ भीष्म उवाच

गायत्र्या किं कृतं तत्र पत्नीत्वे स्थितया तया ।
आभीरैः किं नु तत्त्वज्ञैर्ज्ञात्वा तैश्च कृतं मुने ॥२॥
एतद् वृत्तं समाचक्ष्व यथावृत्तं यथाकृतम् ।
आभीरैर्ब्रह्मणा चापि ममैतत्कौतुकं महत् ॥३॥

पुलस्त्य उवाच

कन्या के मातापितादि ढूढ़ते २ आ गये
गोप्यश्च तास्तथा सर्वा आगता ब्रह्मणोऽन्तिकम् ।
दृष्ट्वा तां मेखलाबद्धां यज्ञसीमव्यवस्थिताम् ॥७॥
हा पुत्रीति तदा माता पिता हा पुत्रिकेति च ।

स्वसेति बांधवाः सर्वे सख्याः सख्येन हा सखि ॥८॥

केन त्वमिह चानीता केन कस्माच्च वेष्टिता ।
मौञ्जी तु त्रिवृता कृत्वा केन युक्ता च कंबली ।९॥

केन चेयं जटा पुत्रि रक्तसूत्रावकल्पिता ।
एवं विधानि वाक्यानि श्रुत्वोवाच पुरंदरः ॥१०॥

प्रतिषिध्य तु तानेवं सर्वानेव प्रसादयन् ।

इन्द्र उवाच

इह चास्माभिरानीता पत्न्यर्थं विनियोजिता ॥११॥

ब्रह्मणालंबिता बाला प्रलापं मा कृथास्त्विह ।

मत्स्यपुराण अ० ३।३२ में ब्रह्माजी की खास पुत्री है

सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप ! ।
ततः स्वदेहसम्भूतामात्मजामित्यकल्पयत् ॥

दृष्ट्वा तां व्यथितस्तावत्कामबाणार्दितो विभुः ।
अहो रूपमहोरूपमितिचाह प्रजापतिः ॥
ततो वशिष्ठप्रमुखाः भगिनोतीति चुक्रुशुः ।

